BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES No. 1349.

तीर्थचिन्तामणिः ।

वाचस्पतिमिश्रविरचितः ।

TĪRTHACINTĀMAṆI

OF

VĀCASPATI MISRA.



EDITED BY

KAMALAKRISHNA SMRITITIRTHA.

FASCICULAS IV.

Calcutta,

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS.

5, Nandakumar Chawdhury's 2nd Lane.

AND PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL, 1, PARK STREET.

1912.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No 1, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH,
11, GRAFTON STREET, NEW BOND STREET, LONDON, W, AND MR OTTO
HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied —some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

Title	Rs	As
Advaitachintā Kaustubha, Fasc 1-3 @ /10/ each	1	14
Aitarēya Brāhmana, Vol. I, Fasc 1-5 ; Vol. II, Fasc 1-5 ; Vol III, Fasc 1-5. Vol IV, Fasc. 1-8 @ /10/ each	14	6
Aitereya Lochana	2	0
Amarkosha, Fasc 1	2	0
*Aṇu Bhāṣhya, Fasc 2-5 @ /10/ each	2	8
Anumana Didhiti Prasarini, Fasc 1 @ /10/-	1	4
Aṣtasāhasrikā Prajñāpāramitā, Fasc 1-6 @ /10/ each	3	12
Atmatattaviveka, Fasc I	0	10
Açvavaidyaka, Fasc 1-5 @ /10/ each	3	2
Avadāna Kalpalatā, (Sans and Tibetan) Vol I, Fasc. 1-10 ; Vol II Fasc 1-10 @ 1/ each	20	0
Bālam Bhaṭṭī, Vol I, Fasc 1-2, Vol II, Fasc 1 @ /10/ each	1	14
Baudhāyana S'rauta Sūtra, Fasc 1-3 Vol II, Fasc 1-5 @ /10/ each	5	0
Bhāsavritty	0	10
Bhātta Dipikā Vol I, Fasc. 1-6 . Vol. 2, Fasc. 1, @ /10 each	4	6
Bauddhastotrasangraha	2	6
Bṛhaddēvatā Fasc 1-4 @ /10/ each	2	8
Bṛhaddharma Purāṇa Fasc 1-6 @ /10/ each	3	1[illegible]
Bodhicaryāvatāra of Çāntideva, Fasc 1-6 @ /10/ each	3	1[illegible]
Cri Cantinatha Charita, Fasc 1-3	1	1[illegible]
Çatadusaṇī, Fasc 1-2 @ /10/ each	1	[illegible]
Catalogue of Sanskrit Books and MSS, Fasc 1-4 @ 2/ each	8	[illegible]
Çatapatha Brāhmaṇa, Vol I. Fasc 1-7, Vol II, Fasc 1-5, Vol III, Fasc. 1-7 Vol. V, Fasc 1-4 @ /10/ each	14	[illegible]
Ditto Vol VI Fasc 1-3 @ 1/4/ each	3	
Ditto Vol. VII, Fasc 1-5 @ /10/	3	
Ditto Vol IX, Fasc 1-2	1	
Çatasāhasrikā Prajñāpāramitā Part, I Fasc 1-17 @ /10/ each	10	1[illegible]
*Caturvarga Chintāmaṇi, Vol II, Fasc 1-25, Vol III Part I, Fasc 1-18. Part II, Fasc 1-10 Vol IV Fasc 1-6 @ /10/ each	36	1[illegible]
Ditto Vol IV, Fasc. 7-8 @ 1/4/ each	2	
Ditto Vol IV, Fasc 9-10 @ /10/	1	
Çlockavartika, (English) Fasc 1-7 @ 1/4/ each	8	[illegible]
*Çrauta Sūtra of Çānkhāyana, Vol I, Fasc 1-7 ; Vol II, Fasc 1-4, Vol III, Fasc 1-4, Vol 4, Fasc 1 @ /10/ each	10	
Çrī Bhāshyam, Fasc 1-3 @ /10/ each	1	
Dāna Kriyā Kaumudī, Fasc 1-2 @ /10/ each	1	
Gadadhara Paddhati Kālasāra Vol I, Fasc 1-7 @ /10/ each	4	
Ditto Āchārasārah Vol. II, Fasc 1-4 @ /10/ each	3	
Gobhiliya Grihya Sutra, Vol I @ /10/ each	3	
Ditto Vol II. Fasc 1-2 @ 1/4/ each	2	
Ditto (Appendix) Gobhila Parisista	2	
Ditto Grihya Sangraha	0	
Haralata	1	
Karmapradipika, Fasc I	1	
Kāla Viveka, Fasc. 1-7 @ /10/ each	4	
Kātantra, Fasc 1-6 @ /12/ each	4	
*Kūrma Purāna, Fasc 1-9 @ /10/ each	5	
Kiranavali, Fasc 1-2 @ /10/ each	1	
Madana Pārijāta, Fasc 1-11 @ /10/ each	6	
Mahā-bhāsya-pradīpōdyōta, Vol I, Fasc 1-9, Vol II Fasc 1-12 Vol III, Fasc 1-10 @ /10/ each	19	
Ditto Vol IV, fasc 1 @ /4	2	
Manuṭikā Sangraha, Fasc 1-3 @ /10/ each	1	
Mārkaṇḍēya Purāṇa, (English) Fasc 1-9 @ 1/- each	9	
*Mīmāṁsā Darçana, Fasc. 10-19 @ /10/ each	6	
*Mugdhabodha Vyakarana, Fasc. 1-4 @ /10/ each	2	

TĪRTHACINTĀMANI

OF

VĀCASPATI MISRA.

EDITED BY

KAMALAKRISHNA SMRITITIRTHA.

CALCUTTA:

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRT PRESS.

No. 5, Nandakumar Chaudhury's 2nd Lane,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 1, PARK STREET.

1912.

तीर्थचिन्तामणिः ।

वाचस्पतिमिश्रविरचितः ।

एशियाटिकसोसाइटीनामिकायाः सभाया अनुमत्या

भट्टपल्लीनिवासिना

श्रीकमलकृष्णस्मृतितीर्थेन

संशोधितः ।

कलिकाता-नगर्य्याम्

श्रीउपेन्द्रनाथचक्रवर्त्तिना

संस्कृतयन्त्रे मुद्रितः

सियाटीकसोसाइटीनामिकया सभया प्रकाशितश्च ।

१९१२ खृष्टाब्दः ।

PREFACE.

The present treatise "Tirtha Cintamani" is one of the series of "Smriti Cintamani" by Vācaspati Misra and treats of the holy places of Hindu pilgrimage The details of rites and ceremonies prescribed in the Castras for performance in the five foremost places of Hindu pilgrimage, Gaya, Purushottama (Puri), Prayag (Allahabad), Kashi (Benares), and Ganga (the sacred river Ganges) have been dealt with in extenso, while the other places of pilgrimage have also been treated generally. The work shows the devoted religious faith of the Hindus and is full of information derived from laborious researches and investigation ; the other works of the same series are Sradha Cintamani, Suddhi Cintamani, etc.

The author Vācaspati Misra belonged to Mithila and flourished in the court of Raja Harinarain Deb, a Brahmin Raja of Mithila, at whose instance he composed the famous Smriti collection "Kirtya Maharnava." After the demise of the Raja, he composed another important Smriti collection "Dwaita Nirnaya" at the instance of the widowed Rani Jayadevi.

The period of the works of the great Bengali savant, Pandit Raghunandana Bhattacharjya, has been determined to be the latter half of the sixteenth century. Raghunandana has freely quoted from Dwaita Nirnaya and also from Sraddha Cintamani and other works of the present author in many places of his famous Smriti collection. Quotations from the present work occur in the chapter deal-

ing with "GANGA MAHATMYA" of his Prayaschittwa tatwa and also in Malamasa tatwa. The period of the present author then dates back before the latter half of the sixteenth century. *Biswakosha* (the Bengali Encyclopaedia) in the article on "*Smriti*" has fixed the age ef Raja Harinarayan Deb and of the present author to be the first period of the sixteenth century.

In editing this book I have consulted *Brahma purana*, *Tristhali Sethu*, Raghunandan's *Asthabingsati tatwa* and other authorities.

Three manuscripts indicated in the foot notes as ক, খ, and গ respectively have been collated for the present publication, one obtained from the rooms of the Asiatic Society of Bengal, the other from the library of the Sanskrit College, Calcutta, and the third from Pandita Panchanana Tarkaratna of my native village, Bhatpara. But the last page was either wanting or illegible in the first two manuscripts and Pandit Bindhweswari Prasad, Librarian of the Benares, Sanskrit College, very kindly lent me the last page of a manuscript in his possession for which I am grateful to him.

In conclusion I am much indebted to the learned members of the Asiatic Society for kindly permitting me to edit these valuable old manuscripts. The services which the Society is rendering to the cause of old Sanskrit literature by the publication and consequent preservation of ancient and useful manuscripts are invaluable and most praise worthy.

The 21st July, 1912.
BHATPARA, 24 PERGANAS. } KAMALA KRISHNA SMRITITIRTHA.

श्रीश्रीरामो जयति ।

तीर्थचिन्तामणेर्विषयसूची ।

ऋषिनामानि ।

संग्रहकारनामानि ।

संग्रहग्रन्थनामानि ।

अन्यान्यग्रन्थनामानि ।

पुराणनामानि।

वराहपुराणम्—२७०,२० ।

वायव्यम्—२८५,२० ।

वायुपुराणम्—४–१ । ७–११ । २७४–१–१३ । २८०–११ । २८३,१६–१९ । २८४,१ । २८६,१२ । २८८,५ । २९६,७ ।

वाराहम्—१९१,१६। २०३,२ ।

विष्णुपुराणम्—९,२ । १८९,१०। २०२, १। २०३, १३। २२२, १३। २६४,१६ ।

स्कान्दपुराणम्—१४,१९। १६,१८। १९२,२ । १९४, ७। १९६,१६। १९७,९ । २६६,१६ । ३३९,१३ । ३४०,१५ ।

स्कान्दम्—२१०,७ । ३५२,१ । ३६०,२ ।

तीर्थचिन्तामणिधृतव्यवस्थापकवचनाना-मकारादिक्रमेण सूची ।

अ ।

आ ।

उ ।

ऋ ।

ए ।

प ।

य ।

श ।

ष ।

स ।

शुद्धिपत्रम् ।

अशुद्धम्	शुद्धम्	पृष्ठायाम्	पंक्त्याम् ।
तीर्थे प्राप्तिदिने	तीर्थंप्राप्तिदिने	१४	१६
अयज्ञीयाः	अयज्ञियाः	१७	१२
तत्व	तत्त्व	१८	१७
मोक्षकामिनः	मोक्षकामिणः	२६	२
कर्व्वूरे	कर्व्वुरे	३७	२०
तत्वाप्लुतासौ	तत्वाप्लुतासो	४७	८
रोमकूपानि	रोमकूपाणि	५०	७
दर्शनजनं	दर्शनजं	१९९	३
भित्वा	भित्त्वा	२०६	३
दानेपु	दानेषु	२३२	१७
संस्थाप्य	संस्नाप्य	२४७	१०
लमेत्	लभेत्	२५०	३
प्रतिपच्चदर्शी	प्रतिपच्चदर्शि	२५६	२०
कव्यालो	कव्यवालो	२८८	१
याथपूर्व्वं	यथापूर्व्वं	२८५	४
पितृणावाह्य	पितॄनावाह्य	२८४	१२
ईरीणि	ईरिणि	२८१	१७
श्वेतछत्न	श्वेतच्छत्र	२५१	७
परं	परा	३६०	१८

आब्रह्मस्तम्बपर्य्यन्तमित्यादिना सतिलाञ्जलिदानरूपं पूर्व्ववदावाहनं कृत्वा—

ॐ पिता पितामहश्चैव तथैव प्रपितामहः।
माता पितामही चैव तथैव प्रपितामही॥
मातामहस्तत्पिता च प्रमातामहकादयः।
तेषां पिण्डो मया दत्तो ह्यक्षय्यमुपतिष्ठताम्॥

इति पौराणिकं मन्त्रमुच्चार्य्य तिल-घृत-दधि-मधु-जलयुतं मुष्टिमितशक्तुकृतं मिलितेभ्यो द्वादशभ्य एकं पिण्डं दद्यात्।

ततः षोड़शीकर्म्म तद्यथा—

ऊनविंशति[१]पिण्डस्थानानि यथादक्षिणं कृतानि प्रत्येकं यथादक्षिणं पञ्चगव्यैरालिप्य तेषु पूर्व्ववद्दक्षिणाग्रं कुशत्रयं धृत्वा—

ॐ अस्मत्कुले मृता ये च गतिर्येषां न विद्यते।
आवाहयिष्ये तान् सर्व्वान् दर्भपृष्ठे[२] तिलोदकैः।
ॐ मातामहकुले ये च गतिर्येषां न विद्यते।
आवाहयिष्ये तान् सर्व्वान् दर्भपृष्ठे[२] तिलोदकैः॥
ॐ बन्धुवर्गकुले ये च गतिर्येषां न विद्यते।
आवाहयिष्ये तान् सर्व्वान् दर्भपृष्ठे[२] तिलोदकैः॥

इति पौराणिकमन्त्रैरास्तृतदर्भेषु तानावाह्य गन्धादिभिरभ्यर्च्य (यदि देवतापदे षोड़शी क्रियते तदा तद्देवतामन्त्रेण तामपि सम्पूज्य) ॐ आब्रह्मस्तम्बपर्य्यन्तमित्यादिश्लोकाभ्यां पूर्व्व-

(१) क ख पुस्तकद्वये दास्यमान इत्यधिकम्।

(२) ग पुस्तके दर्भपदस्थाने कुशपदम्।

आब्रह्मस्तम्बपर्य्यन्तमित्यादिना सतिलाञ्जलिदानरूपं पूर्व्व-वदावाहनं कृत्वा—

ॐ पिता पितामहश्चैव तथैव प्रपितामहः ।
माता पितामही चैव तथैव प्रपितामही ॥
मातामहस्तत्पिता च प्रमातामहकादयः ।
तेषां पिण्डो मया दत्तो ह्यक्षय्यमुपतिष्ठताम् ॥

इति पौराणिकं मन्त्रमुच्चार्य्य तिल-घृत-दधि-मधु-जलयुतं मुष्टिमितशक्तुकृतं मिलितेभ्यो द्वादशभ्य एकं पिण्डं दद्यात् ।

ततः षोड़शीकर्म्म तद्यथा—

ऊनविंशति[1]पिण्डस्थानानि यथादक्षिणं कृतानि प्रत्येकं यथा-दक्षिणं पञ्चगव्यैरालिप्य तेषु पूर्व्ववद्दक्षिणाग्रं कुशत्रयं धृत्वा—

ॐ अस्मत्कुले मृता ये च गतिर्येषां न विद्यते ।
आवाहयिष्ये तान् सर्व्वान् दर्भपृष्ठे[2] तिलोदकैः ।
ॐ मातामहकुले ये च गतिर्येषां न विद्यते ।
आवाहयिष्ये तान् सर्व्वान् दर्भपृष्ठे[2] तिलोदकैः ॥
ॐ बन्धुवर्गकुले ये च गतिर्येषां न विद्यते ।
आवाहयिष्ये तान् सर्व्वान् दर्भपृष्ठे[2] तिलोदकैः ॥

इति पौराणिकमन्त्रैरास्तृतदर्भेषु तानावाह्य गन्धादिभि-रभ्यर्च्य (यदि देवतापदे षोड़शी क्रियते तदा तद्देवतामन्त्रेण तामपि सम्पूज्य) ॐ आब्रह्मस्तम्बपर्य्यन्तमित्यादिश्लोकाभ्यां पूर्व्व-

(१) क ख पुस्तकद्वये दात्स्यमान इत्यधिकम् ।
(२) ग पुस्तके दर्भपदस्थाने कुशपदम् ।

वदेकवारं तत्र तिलोदकाञ्जलिदानं कृत्वा मूलादितः पिण्डान् दद्यात् ।

तत्र क्रमः,—

ॐ अस्मत्कुले मृता ये च गतिर्येषां न विद्यते ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥ (१)
ॐ मातामहकुले ये च गतिर्येषां न विद्यते ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥ (२)
ॐ बन्धुवर्गकुले ये च गतिर्येषां न विद्यते ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥ (३)
ॐ अजातदन्ता ये केचिद् ये च गर्भे प्रपीड़िताः ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥ (४)
ॐ अग्निदग्धाश्च ये केचिन्नाग्निदग्धास्तथापरे ।
विद्युच्चौरहता ये च तेभ्यः पिण्डं ददाम्यहम् ॥ (५)
दावदाहे मृता ये च सिंहव्याघ्रहताश्च ये ।
दंष्ट्रिभिः शृङ्गिभिर्वापि तेभ्यः पिण्डं ददाम्यहम् ॥ (६)
उद्बन्धनमृता ये च विषशस्त्रहताश्च ये ।
आत्मनो घातिनो[१] ये च तेभ्यः पिण्डं ददाम्यहम् ॥ (७)
अरण्ये वर्त्मनि वने क्षुधया तृषया हताः ।
भूतप्रेतपिशाचाश्च तेभ्यः पिण्डं ददाम्यहम् ॥ (८)
रौरवे चान्धतामिस्रे कालसूत्रे च ये मृताः ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥ (९)

(१) ग पुस्तके आत्मोपघातिनः ।

अनेकयातनासंस्थाः प्रेतलोकञ्च[1] ये गताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥ (१०)
अनेकयातनासंस्था ये नीता यमकिङ्करैः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥ (११)
नरकेषु समस्तेषु यातनासु च ये स्थिताः।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥ (१२)
पशुयोनिगता ये च पक्षिकीटसरीसृपाः।
अथवा [2]वृक्षयोनिस्थास्तेभ्यः पिण्डं ददाम्यहम्॥ (१३)
जात्यन्तरसहस्रेषु भ्रमन्तः स्वेन कर्म्मणा।
मानुष्यं दुर्लभं येषां तेभ्यः पिण्डं ददाम्यहम्॥ (१४)
दिव्यन्तरीक्षभूमिष्ठाः पितरो बान्धवादयः।
असंस्कृतमृता[3] ये च तेभ्यः पिण्डं ददाम्यहम्॥ (१५)
ये केचित् प्रेतरूपेण वर्त्तन्ते पितरो मम।
ते सर्व्वे तृप्तिमायान्तु पिण्डदानेन सर्व्वदा॥ (१६)
येऽबान्धवा बान्धवा ये येऽन्यजन्मनि बान्धवाः।
तेषां पिण्डो मया दत्तो[4]ऽक्षय्यमुपतिष्ठताम्॥ (१७)
पितृवंशे मृता ये च मातृवंशे च ये मृताः।
गुरु श्वशुर-बन्धूनां ये चान्ये बान्धवा मृताः॥

---

(१) ग पुस्तके लोके च।
(२) ख पुस्तके वृषयोनिस्थाः।
(३) क ख पुस्तकद्वये मृता असंस्कृता ये च।
(४) क ख पुस्तकद्वये दत्त अक्षय्यम्।

ये मे कुले लुप्तपिण्डाः पुत्रदारविवर्ज्जिताः ।
क्रियालोपगता ये च जात्यन्धाः पङ्गवस्तथा ॥
विरूपा आमगर्भाश्च ज्ञाताऽज्ञाताः कुले मम ।
तेषां पिण्डो मया दत्तोऽक्षय्यमुपतिष्ठताम् ॥ (१८)

आ ब्रह्मणो ये पितृवंशजाता
मातुस्तथा वंशभवा मदीयाः ।
कुलद्वये ये मम दासभूता
भृत्यास्तथैवाश्रितसेवकाश्च ॥
मित्राणि सख्यः[1] पशवश्च वृक्षा
दृष्टा ह्यदृष्टाश्च कृतोपकाराः ।
जन्मान्तरे ये मम सङ्गताश्च
तेभ्यः स्वधा पिण्डमहं ददानि[2] ॥ १९ ॥

इति पठित्वा ॐकारपूर्व्वमुच्चार्य्य अपसव्येन कथितप्रमाण-कानुनविंशतिपिण्डान् प्रत्येकं दद्यात् । इति—

स्त्रीषोड़श्यान्तु—

अस्मत्कुले मृता ये चेत्यावाहनमन्त्रादारभ्य मित्राणि सख्य इति पर्य्यन्तं सम्भवत्स्त्रीलिङ्गमूहनीयम्, अन्यत्तु पुंषोड़शीवत् सर्व्वम् ।

ततः सर्व्वेषु पिण्डेषु तिलजलपूर्णपात्रेण प्रदक्षिणं वारत्रयं परिषिचनं कार्य्यम् । तत्र मन्त्रः—

(१) मूलपुस्तके शिष्याः ।
(२) ग पुस्तके ददामि ।

ॐ ये च वो ये चास्मास्वासन् याश्च वो याश्चास्मास्वासन् ते चावाह्यन्तां ताश्चावाह्यन्ताम्। तृप्यन्तु भवन्तस्तृप्यन्तु भवत्यस्तृप्यत गोत्रान् पुत्रानभितर्पयन्तीरापो मधुमतीरिमाः। स्वधां पितृभ्यो-ऽमृतं दुहाना आपो देवीरभयास्तृप्यन्तु। तृप्यत तृप्यत तृप्यतेति।

ततः प्रणिपत्य ॐ पित्रादयः क्षमध्वमिति तान् विसृजेत्। ततः सव्येनाचम्य कृताञ्जलिः—

ॐ साक्षिणः सन्तु मे देवा ब्रह्मेशानादयस्तथा।
मया गयां समासाद्य पितॄणां निष्कृतिः कृता॥
आगतोऽस्मि गयां देव पितृकार्य्ये गदाधर।
त्वमेव साक्षी भगवाननृणोऽहमृणत्रयात्॥

इति प्राङ्मुखः पठेत्। एतावत्क्रियाकलापाशक्तौ प्रेत-शिलायां पिण्डदानमपि कर्त्तव्यम्।

तद्यथा,—

ॐ अद्यामुकगोत्राणां पितृ-पितामह-प्रपितामहानाममुका-मुकशर्म्मणाममुकगोत्राणां मातृ पितामही-प्रपितामहीनाममुका-मुकदेवीनाम् अमुकगोत्राणां मातामह-प्रमातामह-वृद्धप्रमाता-महानाममुकामुकशर्म्मणाम् अमुकगोत्राणां मातामही-प्रमाता-मही-वृद्धप्रमातामहीनाममुकामुकदेवीनां प्रेतत्वविमुक्तिकामः प्रेत-शिलायां पिण्डदानमहं करिष्ये।

इति सङ्कल्प्यापसव्यं कृत्वा कव्यवालोऽनल इत्यादिनावाह्य अनृणोऽहमृणत्रयादित्यन्तं काण्डं पूर्व्वलिखितं कुर्य्यादित्यर्थः।

केचित्तु षट्पुरुषाणामेव प्रेतत्वविमुक्तिकामनया पिण्डदानं

कार्य्यमिति, तत्र च वेदिद्वयकरण-रेखाकरण-तदङ्गावभ्रामण-च्छिन्नमूलधारणावनेजन-पिण्डदान-प्रत्यवनेजन-श्वासधारण-नीवी-भ्रंशन[२] सूत्रदान-गन्धदानान्येव स्वसूत्रोक्तानि वाजसनेयिना कार्य्याणि, एवमन्येनापि स्वसूत्रानुसारेणैव तत्कार्य्यमित्याहुः ।

एतदन्यतमकरणानन्तरन्तु पर्व्वतादवरुह्य पृथिव्यां प्रभासादि-सङ्गतायां महानद्यां रामतीर्थत्वेन प्रसिद्धे प्रभासह्रदे—ॐ अद्य साग्रजन्मान्तरशतकृतदुष्कृतविलयकामोऽस्मिन् तीर्थे स्नानमहं करिष्ये इति सङ्कल्प्य स्नानतर्पणे कृत्वा तत्र स्नानीयप्रकृतसकल-मन्त्रपाठानन्तरम्—

ॐ जन्मान्तरशतं साग्रं यत्कृतं दुष्कृतं मया ।
तत्सर्व्वं विलयं यातु रामतीर्थाभिषेचनात् ॥

इति पौराणिकमन्त्रं पठित्वा मज्जेत् ।

ॐ अद्य विष्णुलोकगमनकामो रामतीर्थे श्राद्धमहं पिण्ड-दानं वा करिष्ये—इति सङ्कल्प्य पार्व्वणं पिण्डदानमात्रं वा तत्र कुर्य्यात् ।

इदं पार्व्वणं पिण्डदानञ्च सूत्रानुसारेणैव कर्त्तव्यम् गयोक्त-फलकपितृकर्म्मत्वाभावादिति ।

ॐ अद्य पित्रादिप्रेतत्वविमुक्तिपूर्व्वकपितृत्वप्राप्तिकामो राम-तीर्थे पितॄणां पिण्डदानमहं करिष्ये इति सङ्कल्प्य प्रेतशिलोक्त-रीत्या पित्रादिद्वादशपिण्डाऽक्षय्यपिण्ड-षोड़शीपिण्डान् दद्यात् ।

---

(२) ख पुस्तके विस्रंशन ।

विष्णुलोकफलकस्यास्य चोभयस्याप्यत्र करणासामर्थ्येऽन्यतर-देव कर्त्तव्यमिति[1]।

ततः—ॐ राम राम महाबाहो देवानामभयप्रद[2]।

त्वां नमस्येऽद्य[3]देवेशं मम नश्यतु पातकम्॥

इति पठित्वा स्वर्गकामो रामं नमस्कुर्य्यात्।

तत ॐ भासमानस्वकर्त्तृकशिवलोकगमनकामः प्रभासेश-नमस्कारमहं करिष्ये इति सङ्कल्प्य प्रभासेशं नमस्कुर्य्यात्। ततो राम-प्रभासेशौ नमस्कुर्य्यात्।

ॐ आपस्त्वमसि देवेश ज्योतिषां पतिरेव च।

पापं नाशय मे देव मनोवाक्कायकर्म्मजम्॥

इति पौराणिकमन्त्रं पठित्वा—

ॐ यमायैष बलिर्नम इति कुशत्रयजलेन दैवरीत्या भक्तादि-रूपं बलिं दद्यात्।

प्रभासपर्व्वतदक्षिणदिगवस्थितप्रेतशिलाजघनस्थे नगनाम्नि पर्व्वते—

ॐ श्वानौ द्वौ श्याम[4]-शवलौ वैवस्वतकुलोद्भवौ।

ताभ्यां पिण्डं प्रयच्छामि स्यातामेतावहिंसकौ॥

इति पठित्वा यमराज-भ्रमराजाभ्यामेष बलिर्नम इति तयो-

---

(१) क ख पुस्तकद्वये इदानिमिति।

(२) क पुस्तके अभयङ्कर।

(३) ग पुस्तके नमस्येऽहं।

(४) मूले—श्याव।

मिलितयोरोदनाद्यन्यतमबलिं दद्यात्। इदञ्च बलिदानं नित्य-प्रकरणेऽनिष्टश्रवणात्।

अन्यत्तु सर्व्वं काम्यं स्वतन्त्रञ्च। तथाच तेषु यावदेव कर्त्तु-मिष्यते तावदेव कर्त्तव्यं न तु सर्व्वमेवेत्यवधेयम्।

इति गयाकृत्ये प्रथमदिनकृत्यम्।

अथ द्वितीयदिनकृत्यम्।

तत्र वायुपुराणे—

अपरेऽह्नि शुचिर्भूत्वा गच्छेत प्रेतपर्व्वतम्।
ब्रह्मकुण्डे ततः स्नात्वा देवादींस्तर्पयेत् सुधीः॥
कृत्वाह्वानं पितॄणान्तु प्रयतः प्रेतपर्व्वते।
प्राचीनावीतिना भाव्यं (?) दक्षिणाभिमुखः स्मरन्॥

कव्यवाल इत्यादि—शाश्वतीमित्यन्तेन पितॄनावाह्य पूर्व्ववत् प्राणायामादिसाक्षिश्रावणपर्य्यन्तं प्रेतशिलोक्तं कुर्य्यात्।

तिलमिश्रांस्ततः शक्तून् निक्षिपेत् प्रेतपर्व्वते।
प्रेतत्वात्तु विमुक्ताः स्युः पितरस्तस्य नारद।
प्रेतत्वं तस्य माहात्म्यादस्य चापि न विद्यते॥

तदयमत्रानुष्ठानक्रमः—

गयाप्राप्तिदिनोत्तरदिने फल्गुतीर्थादौ यथाविधि स्नात्वा देवार्च्चनान्तं कर्म्म कृत्वा प्रेतपर्व्वतं गयावायव्यदिशि गयातो गव्यूत्य-

धिकदूरस्थं गत्वा तन्मूलसंलग्नतदीशानकोणस्थे ब्रह्मकुण्डे स्वर्ग-कामनया स्नात्वा तर्पणं कृत्वा तं प्रेतपर्व्वतमारुह्य तत्र पित्राद्वाना-दिसाक्षिश्रावणपर्य्यन्तं प्रेतशिलावदेव कर्त्तव्यम्।

अयन्तु विशेषः—

ॐ अद्य पुनरावृत्तिरहितब्रह्मलोकावाप्तिकामः प्रेतपर्व्वते श्राद्धमहं करिष्ये इति पार्व्वणसङ्कल्पः। तच्च पार्व्वणं ब्रह्मवेद्यां क्रियते इति समाचारः।

ततः साक्षिश्रावणानन्तरम्—

अद्य पितृगणप्रेतत्वविमुक्ति-स्वगतप्रेतत्वाभावकामः प्रेतपर्व्वते तिलमिश्रशक्तुप्रक्षेपमहं करिष्ये इति सङ्कल्प्य तिलमिश्रशक्तून् प्रेत-पर्व्वते दक्षिणामुखः प्रक्षिपेदनेन मन्त्रेण—

ॐ ये केचित् प्रेतरूपेण वर्त्तन्ते पितरो मम।
ते सर्व्वे तृप्तिमायान्तु शक्तुभिस्तिलमिश्रितैः॥ इति।

ॐ आब्रह्मस्तम्बपर्य्यन्तं यत्किञ्चित् सचराचरम्।
मया दत्तेन तोयेन तृप्तिमायातु सर्व्वशः॥

इति मन्त्रेण तोयाञ्जलिं दद्यात्।

ततो यथाशक्ति दक्षिणां सिद्धवद्दद्यात्।

इति प्रेतपर्व्वतविधिः।

अथ पञ्चतीर्थीकृत्यम् ।

तत्र वायुपुराणे—

आदौ च पञ्चतीर्थेषु चोत्तरे मानसे विधिः ।
आचम्य कुशहस्तेन शिरश्चाभ्युक्ष्य वारिणा ॥
उत्तरं मानसं गच्छेन्मन्त्रेण स्नानमाचरेत् ।
ॐ उत्तरे मानसे स्नानं करोम्यात्मविशुद्धये ॥
सूर्य्यलोकादिसंसिद्धिसिद्धये पितृमुक्तये ॥
स्नात्वाऽथ तर्पणं कुर्य्याद्देवादीनां यथाविधि ॥
आब्रह्मस्तम्बपर्य्यन्तं देवर्षिपितृमानवाः ।
तृप्यन्तु पितरः सर्व्वे मातृमातामहादयः ॥
श्राद्धं सपिण्डकं कुर्य्यात् स्वसूत्रोक्तविधानतः ।
अष्टकासु च वृद्धौ च गयायाञ्च क्षयाहनि ॥
मातुः श्राद्धं पृथक् कुर्य्यादन्यत्र पतिना सह ।
वृद्धिश्राद्धे च मात्रादि गयायां पितृपूर्व्वकम् ॥
पिता पितामहश्चैव तथैव प्रपितामहः ।
माता पितामही चैव तथैव प्रपितामही ॥
मातामहस्तत्पिता च प्रमातामहकादयः ।
तेषां पिण्डो मया दत्तोऽक्षय्यमुपतिष्ठताम् ॥
ॐ नमो भानवे भर्त्रे सोम-भौम-ज्ञरूपिणे ।
जीव-भार्गव सौरेय-राहु-केतुस्वरूपिणे ॥
सूर्य्यं नत्वाऽर्च्चयित्वा च सूर्य्यलोकं नयेत् पितॄन् ।

मानसं हि सरो ह्यत्र तस्मादुत्तरमानसम् ॥
उत्तरान्मानसान्मौनी गच्छेद्दक्षिणमानसम् ।
उदीचीतीर्थमित्युक्तं तत्रोदीच्यां विमुक्तिदम् ॥
उदीच्यां मुण्डपृष्ठस्य[1] देवर्षिपितृसेवितम् ।
मध्ये कनखलं तीर्थं पितॄणां मुक्तिदायकम् ॥
स्नातः कनकवद्भाति नरो याति पवित्रताम् ।
अतः कनखलं लोके ख्यातं तीर्थमनुत्तमम् ॥
तस्य दक्षिणभागे तु तीर्थं दक्षिणमानसम् ।
दक्षिणे मानसे चैव तीर्थत्रयमुदाहृतम् ॥
स्नात्वा तेषु विधानेन कुर्य्यात् श्राद्धं पृथक् पृथक् ॥
दक्षिणे मानसे स्नानं करोम्यात्मविशुद्धये ।
सूर्य्यलोकादिसंसिद्धिसिद्धये पितृमुक्तये ॥
अतः कनकनन्देति स्नानमात्राद्विमुक्तिदा ।
नमामि सूर्य्यं तृप्त्यर्थं पितॄणां तारणाय च ॥
पुत्रपौत्रधनैश्वर्य्यायायुरारोग्यवृद्धये ॥
ब्रह्महत्यादिपापौघ-यातनाया[2] विमुक्तये ।
दिवाकर करोमीह स्नानं दक्षिणमानसे ॥
अनेन स्नानपूजादि कुर्य्यात् श्राद्धं सपिण्डकम् ।
कृत्वा नत्वाऽथ मौनार्कमिमं मन्त्रमुदीरयेत् ॥
कव्यवालोऽनलः सोमो यमश्चैवार्य्यमा तथा ।

---

(१) ग पुस्तके खभूपृष्ठस्य ।

(२) ग पुस्तके यातनाय ।

अग्निष्वात्ता बर्हिषदः सोमपाः पितृदेवताः ।
आगच्छन्तु महाभागा युष्माभीरक्षितास्त्विह ॥
मदीयाः पितरो ये च कुले जाताः सनाभयः ।
तेषां पिण्डप्रदाताऽहमागतोऽस्मि गयामिमाम् ॥
फल्गुतीर्थं व्रजेत्तस्मात् सर्व्वतीर्थोत्तमोत्तमम् ।
मुक्तिर्भवति कर्त्तॄणां पितॄणां[२] श्राद्धतः सुराः ॥
ब्रह्मणा प्रार्थितो विष्णुःफल्गुतो ह्यभवत् पुरा ।
दक्षिणाग्नौ हुतं नूनं तद्भवं[३] फल्गुतीर्थकम् ॥
यस्मिन् फलति फल्गौ गौः कामधेनुर्जलं मही ॥
दृष्टेरन्तर्गतं यस्मात् फल्गुतीर्थं न निष्फलम् ॥
तीर्थानि यानि सर्व्वाणि भुवनेष्वखिलेषु च ।
तानि स्नातुं समायान्ति फल्गुतीर्थं सुरैः सह ॥
गङ्गा पादोदकं विष्णोः फल्गुर्ह्यादिगदाधरः ।
हिमद्रवस्वरूपेण तस्माद्गङ्गाधिकां विदुः ॥
अश्वमेधसहस्राणां सहस्रं यः समाचरेत् ।
नासौ तत्फलमाप्नोति फल्गुतीर्थे यदाप्नुयात् ॥
फल्गुतीर्थे विष्णुजले करोमि स्नानमादृतः ।
पितॄणां विष्णुलोकाय भुक्ति-मुक्तिप्रसिद्धये ॥
फल्गुतीर्थे नरः स्नात्वा तर्पणं श्राद्धमाचरेत् ।

---

(१) क ग पुस्तकद्वये मानसे ।

(२) मूलपुस्तके तद्भजः ।

सपिण्डकं स्वसूत्रोक्तं नमेदथ पितामहम् ॥
ॐ नमः शिवाय देवाय ईशानपुरुषाय च ।
अघोरवामदेवाय सद्योजाताय शम्भवे ॥
नत्वा पितामहं देवं मन्त्रेणानेन पूजयेत् ।
फल्गुतीर्थे नरः स्नात्वा दृष्ट्वा देवं गदाधरम् ।
आत्मानं पितृभिः सार्द्धं तन्नयेद्वैष्णवं पदम् ॥
ॐ नमो वासुदेवाय नमः सङ्कर्षणाय च ।
प्रद्युम्नायानिरुद्धाय श्रीधराय च विष्णवे ॥
पञ्चतीर्थे नरः स्नात्वा ब्रह्मलोकं नयेत् पितॄन् ॥
अमृतैः पञ्चभिः स्नानं पुष्पवस्त्राद्यलङ्कृतम् ।
न कुर्य्याद्यो गदापाणे स्तस्य श्राद्धमनर्थकम् ॥
नागकूटात् गृध्रकूटादिष्टाच्चोत्तरमानसात्[1] ।
एतद्गयाशिरः प्रोक्तं फल्गुतीर्थं तदुच्यते ॥
मुण्डपृष्ठनगाधस्तात् फल्गुतीर्थमनुत्तमम् ।
अत्र श्राद्धादिना सर्व्वे पितरो मोक्षमाप्नुयुः ॥

आदाविति पञ्चतीर्थीकर्म्मणि चादावुत्तरमानसे विधिः। मन्त्रेणेति—उत्तरे मानसे इत्यादिमन्त्रं प्रकृतस्नानीयमन्त्रानन्तरं पठित्वा स्नानमज्जनं कर्त्तव्यमित्यर्थः ।

ततः प्रकृततर्पणानन्तरमाब्रह्मस्तम्बपर्य्यन्तमित्यादिना मन्त्रेण देवविधिनैकोऽञ्जलिर्देयः । ततः पित्रादि-मातामहादि-मात्रादि-मातामह्यादीनां पार्व्वणं कृत्वा प्रेतशिलावदक्षय्यपिण्डं दद्यादिति ।

(१) मूले—यूपादुत्तरमानसात् ।

अष्टकासु चेत्यादिना—अष्टकाभ्युदयिक-क्षयाह-गयासु च चतसृषु स्त्रीणां पृथक् श्राद्धमित्यर्थः ।

वृद्धौति—आभ्युदयिकं मातृपक्रमकं गयायां पितृपक्रमकं श्राद्धाचरणमित्यर्थः ।

अत्र च श्राद्धोद्देश्यानां शाश्वतब्रह्मप्राप्तिः फलमुत्तर-मानसस्य गयाशिरोऽभ्यन्तरत्वात् तत्र च—

शमीपत्रप्रमाणेन पिण्डं दद्याद्गयाशिरे ।

यन्नाम्ना पातयेत् पिण्डं तं नयेद् ब्रह्म शाश्वतम् ॥

इति वचनात् ।

एवमक्षय्यतृप्तिर्वा फलं पुष्करेष्वक्षयं श्राद्धमित्युपक्रम्य एवमेव गयाशीर्षेऽक्षयवटे फल्गुतीर्थे उत्तरमानसे मतङ्गवाप्यां विष्णुपदे चेति विष्णुवचनात् ।

सूर्य्यमिति—सूर्य्यलोकगमनकामनया सूर्य्यनति-सूर्य्यार्चनञ्च कार्य्यमिति ।

अत्रोभयत्र ॐ नमो भानवे इत्यादिमन्त्र इत्यर्थः । तत्र दक्षिणमानसे त्रिधाविभक्ते उत्तरभागे उदीचीमध्यभागः कनखलं दक्षिणभागो दक्षिणमानसम् ।

अत्र तीर्थत्रये प्रत्येकं श्राद्धे स्नाने पितृमुक्तिः फलम् । दक्षिण-मानसस्नाने तु मन्त्रः—ॐ दक्षिणे मानस इत्यादिः । ब्रह्महत्यादी-त्यादि च श्लोकद्वयमधिकम् । नमामि सूर्य्यमित्यादिस्तु दक्षिणार्क-दर्शने मन्त्र इति वर्त्तुलार्थः ।

कव्यवाल इत्यादिमन्त्रं पठित्वा दक्षिणमानसात् फल्गु-

तीर्थं गन्तव्यम्। अत्र दशाश्वमेधफलप्राप्तिकामनया स्नानम् तत्र फल्गुतीर्थे इत्यादिमन्त्रः। तत्र स्नात्वा तर्पणं कार्य्यं तत्र च स्वधोदीरणानन्तरं पितरं प्रीणयामीत्यादि प्रयोज्यं ततः पितृमुक्तिकामनया तत्र श्राद्धं कार्य्यमिति वर्त्तुलार्थः।

नमेदथेत्यनन्तरं—मधुस्रवादक्षिणकूलस्थं पितामहम्—नमः शिवायेत्यादि पठित्वा नमेत् पूजयेच्चेत्यर्थः।

ततः पुनर्गदाधरप्राच्यां फल्गुतीर्थे पित्रादिसहितात्मवैष्णवपदनयनकामनया तत्र स्नात्वा गदाधरं पश्येत्।

गदाधरश्च—प्रतिमारूपोऽपि तदधिकरणीभूतमुण्डपृष्ठाद्रिरपि।

तदुक्तं वायुपुराणे—

अव्यक्तरूपी यो देवो मुण्डपृष्ठाद्रिरूपतः।
फल्गुतीर्थादिरूपेण नमाम्यादिगदाधरम्॥ इति।
शिलापर्व्वतफल्ग्वादिरूपेण व्यक्तमास्थितः।
शिलापादादिरूपेण व्यक्ताव्यक्ततया स्थितः।
गदाधरादिरूपेण व्यक्त आदिगदाधरः॥

दर्शनानन्तरम्—

ओं नमो वासुदेवायेत्यादिना तन्नमस्कार-पूजे कृत्वा पितृब्रह्मलोकगमनकाम इत्यादि सङ्कल्पवाक्यं कृत्वा पवित्रोपग्रहपाणिराचम्य वारिणा शिरोऽभ्युक्ष्य उत्तरमानसोदीची-कनखल दक्षिणमानसफल्गुतीर्थेषु यथाक्रमं सविधिस्नानतर्पणे प्रत्येकं कृत्वा ततो दुग्धदधिघृतमधुखण्डात्मकेन पञ्चामृतेनाष्टोत्तरशतपलमितेन स्नपयित्वा वस्त्रपुष्पालङ्कारैरर्च्चयेदित्यर्थः।

अथैतदनुष्ठानक्रमः—

गयाप्राप्तितृतीयदिने फल्गुतीर्थे स्नानादि-देवार्च्चनान्तं कृत्वा पवित्रोपग्रहपाणिराचम्य वारिणाऽभ्युत्य तत्रोत्तरमानसं गत्वा—ॐ अद्य पापक्षयकाम उत्तरमानसे स्नानमहं करिष्ये। इति सङ्कल्प्य स्नानीयमन्त्रान् पठित्वा—

ॐ उत्तरे मानसे स्नानं करोम्यात्मविशुद्धये ।
सूर्य्यलोकादिसंसिद्धिसिद्धये पितृमुक्तये ॥

इति पठित्वा मज्जनं कार्य्यम् ।

ततस्तर्पणम्—तत्र च पित्राद्यञ्जलिषु स्वधोदीरणानन्तरं पितरं प्रीणयामीति प्रयोज्यम् ।

ततस्तर्पणशेषे—देवविधिना—

ॐ आब्रह्मस्तम्बपर्य्यन्तं देवर्षिपितृमानवाः ।
तृप्यन्तु पितरः सर्व्वे मातृमातामहादयः ॥

इति पठित्वा एकोऽञ्जलिर्देयः ।

ततः ॐ अद्यामुकगोत्राणां पितृ-पितामह-प्रपितामहाना-ममुकामुकशर्म्मणाममुकगोत्राणां मातृ-पितामही-प्रपितामहीना-ममुकामुकदेवीनाममुकगोत्राणां मातामह-प्रमातामह-वृद्धप्रमा-तामहानाममुकामुकशर्म्मणाममुकगोत्राणां मातामही-प्रमाता-मही-वृद्धप्रमातामहीनाममुकामुकदेवीनां शाश्वतब्रह्मप्राप्तिकामो-ऽक्षयतृप्तिकामो वा श्राद्धमहं करिष्ये। इति सङ्कल्प्य द्वादशदैवतं श्राद्धमाचरेत् । मातामह्यादित्रिकवर्ज्जमिति हेमाद्रिः ।

गयायां सर्व्वत्रैव षट्पुरुषश्राद्धमिति प्राञ्चः ।

तथाच—तत्रैतदन्यतमं श्राद्धं कृत्वा दक्षिणदिशि उपविश्य समूलान् दक्षिणाग्रान् कुशानास्तीर्य्य—

ॐ कव्यवालोऽनलः सोमो यमश्चैवार्य्यमा तथा।
अग्निष्वात्ता बर्हिषदः सोमपाः पितृदेवताः॥
आगच्छन्तु महाभागा युष्माभीरक्षितास्त्विह।
मदीयाः पितरो ये च कुले जाताः सनाभयः॥
तेषां पिण्डप्रदानार्थमागतोऽस्मि गयामिमाम्॥
ते सर्व्वे तृप्तिमायान्तु श्राद्धेनानेन शाश्वतीम्॥

इति पठित्वा सकृत्तिलोदकाञ्जलिदानरूपमावाहनं कृत्वा एतानि पाद्यादीनि 'ॐ पित्रादिभ्यो नमः' इति पञ्चोपचारेण पित्रादीन् सम्पूज्य—

ॐ आब्रह्मस्तम्बपर्य्यन्तं देवर्षि-पितृ-मानवाः।
तृप्यन्तु पितरः सर्व्वे मातृ-मातामहादयः॥
अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम्।
आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम्॥

इति पठित्वा सकृत्तिलोदकाञ्जलिदानरूपमावाहनं पुनः कृत्वा—ॐ–पिता पितामहश्चैव तथैव प्रपितामहः।
मातामहस्तत्पिता च प्रमातामहकादयः॥
माता पितामही चैव तथैव प्रपितामही।
तेषां पिण्डो मया दत्तोऽक्षय्यमुपतिष्ठताम्॥

इति पौराणिकं मन्त्रमुच्चार्य्य तिल-दधि-मधु-घृत-जलयुतं मुष्टिमितशक्तुकृतमेकं पिण्डं मिलितेभ्यो दद्यात्। इति।

तत ॐ पितृसूर्य्यलोकनयनकामनया उत्तरार्कस्य नतिमहं करिष्ये । पूजायामयमेव सङ्कल्पः ।

तत—ॐ नमो भानवे भर्त्रे सोम-भौम-ज्ञरूपिणे ।
जीव-भार्गव-सौरेय-राहु-केतुस्वरूपिणे ॥

इति मन्त्रेण नतिः पूजा च कार्य्या । ततो दक्षिणमानसं गत्वा तत्रोदीच्याम्—ॐ अद्य पितृमुक्तिकाम उदीचीतीर्थे स्नानमहं करिष्ये इति सङ्कल्पय पूर्व्ववत् स्नान-तर्पणे कृत्वा पूर्व्ववदेव द्वादश-दैवतं षड्दैवतं वा पार्व्वणं कृत्वा मध्यमं कनखलतीर्थं गच्छेत् । तत्रापि—

ॐ अद्य पितृमुक्तिकामः कनखलतीर्थे स्नानमहं करिष्ये, इति सङ्कल्पय,—स्नानतर्पणे पितृमुक्तिकामनया तत्र श्राद्धञ्च कृत्वा—तत ॐ अद्य पितृमुक्तिकामो दक्षिणमानसे स्नानमहं करिष्ये इति सङ्कल्पय स्नानीयसर्व्वमन्त्रान्ते—

ॐ दक्षिणे मानसे स्नानं करोम्यात्मविशुद्धये ।
सूर्य्यलोकादिसंसिद्धिसिद्धये पितृमुक्तये ।
दिवाकर करोमीह स्नानं दक्षिणमानसे ॥

इति पठित्वा मज्जेत् ।

ततः पूर्व्ववत्तर्पणं कृत्वा पितृमुक्तिकामनया तत्र श्राद्धञ्च कृत्वा—

ॐ नमामि सूर्य्यं तृप्त्यर्थं पितॄणां तारणाय च ।
पुत्रपौत्रधनैश्वर्य्यायायुरारोग्यवृद्धये ॥

इति मन्त्रेण दक्षिणार्कस्य दर्शनं पूजा च मौनेनैव [1]कर्त्तव्या। यतः स मौनार्कनामा।

ततः—ॐ कव्यवालोऽनलः सोमो यमश्चैवार्य्यमा तथा। इत्यादि ([2]आगतोऽस्मि गयामित्यन्तं) दक्षिणमानस एव पठित्वा गदाधरपूर्व्वदेशस्थमतिप्रशस्तं फल्गुतीर्थं गच्छेत्।

तत्र च—ॐ अद्य दशलक्षाश्वमेधजन्यपुण्यफलविलक्षणफल-प्राप्तिकामः फल्गुतीर्थे स्नानमहं करिष्ये, इति सङ्कल्प्य प्रकृत-स्नानीयमन्त्रान्ते—

ॐ फल्गुतीर्थे [3]पुण्यजले करोमि स्नानमादृतः।
पितॄणां विष्णुलोकाय भुक्तिमुक्तिप्रसिद्धये॥

इति पठित्वा मज्जेत्।

ततः पूर्व्ववत्तर्पणं कृत्वा पितृमुक्तिकामनया द्वादशदैवतं षड्दैवतं वा श्राद्धं तत्र कुर्य्यात्। ततो मधुश्रवादक्षिणदिगवस्थितं पितामहम्—

ॐ नमः शिवाय देवाय ईशानपुरुषाय च।
अघोरवामदेवाय सद्योजाताय शम्भवे॥

इति पठित्वा पितामहं प्रणमेत् पूजयेच्च। ततः पुनः फल्गुतीर्थमागत्य—

ॐ अद्य पित्रादिसहितात्मवैष्णवपदनयनकामः फल्गुतीर्थे

---

(१) ग पुस्तके तस्य तु कर्म्म मौनेनैव कर्त्तव्यम्।

(२) क पुस्तके चिह्नितांशः पतितः।

(३) ख पुस्तके विष्णुजले।

स्नात्वा गदाधरदर्शनमहं करिष्ये । इति सङ्कल्प्य तत्र सविधि स्नानं कर्त्तव्यम् । गदाधरस्य प्रतिमारूपस्तदधिकरणीभूतमुण्डपृष्ठाद्रिरूपस्य इति ।

तद्दर्शनानन्तरम्—

ॐ नमो वासुदेवाय नमः सङ्कर्षणाय च ।
प्रद्युम्नायानिरुद्धाय श्रीधराय च विष्णवे ॥

इति पठित्वा गदाधरं प्रणमेत् पूजयेच्च ।

तत उत्तरमानसं गत्वा ॐ अद्य पितृब्रह्मलोकनयनकामः पञ्चतीर्थ्यां स्नानमहं करिष्ये । इति सङ्कल्प्योत्तरमानसे उदीच्यां कनखले दक्षिणमानसे फल्गुतीर्थे च यथाक्रमं सविधि प्रत्येकं स्नानतर्पणे कुर्य्यात् ।

ततो गदाधरसमीपं गत्वा दुग्ध-दधि-घृत-मधुखण्डात्मकेन पञ्चामृतेनाष्टोत्तरशतपलमितेन गदाधरं स्नपयित्वा पुष्पवस्त्रालङ्कारैरर्च्चयेदिति ।

एतेषाञ्च कर्म्मणां मध्ये चरमं पञ्चामृतस्नानमेवावश्यकम् । अकरणे [1]निन्दार्थवादात् । इतराणि तु काम्यानि स्वतन्त्राणि चेति यथाशक्ति कार्य्याणीति ।

इति पञ्चतीर्थीकृत्यम् ।

---

(१) ख पुस्तके निन्दानुवादात् ।

अथ पञ्चतीर्थीकर्म्मापेक्षया यावद्द्वितीयं दिनं तत्कृत्यमाह ।

[1]वायुपुराणम्—

प्रथमेऽह्नि विधिः प्रोक्तो द्वितीये दिवसे व्रजेत् ।
धर्म्मारण्यं तत्र धर्म्मो यस्माद्यागमकारयत् ॥
मतङ्गवाप्यां स्नात्वा तु तर्पणं श्राद्धमाचरेत् ।
गत्वा नत्वा मतङ्गेशमिमं मन्त्रमुदीरयेत् ॥
प्रमाणं देवताः सन्तु लोकपालाश्च साक्षिणः ।
[2]मयागत्य मतङ्गेऽस्मिन् पितॄणां निष्कृतिः कृता ।
पूर्व्ववत् ब्रह्मतीर्थे च कूपे श्राद्धादि कारयेत् ॥
तत् कूप-यूपयोर्मध्ये कुर्व्वंस्तारयते पितॄन् ।
धर्म्मं धर्म्मेश्वरं नत्वा महाबोधितरुं नमेत् ॥

तदयमनुष्ठानक्रमः—

स्नात्वा देवार्च्चनान्तं कर्म्म कृत्वा ॐ अद्य ब्रह्मलोकगमनकामो धर्म्मारण्यगमनमहं करिष्ये। इति प्रामाणिक[3]प्रसिद्धिसिद्धं सङ्कल्पं कृत्वा तत्र गत्वा मतङ्गवाप्याम्—

'ॐ अद्य सर्व्वपापक्षयकामो मतङ्गवाप्यां स्नानमहं करिष्ये'।

इति सङ्कल्प्य स्नातव्यम्। पुष्करे स्नानमात्रेण सर्व्वपापेभ्यः

---

(१) ग पुस्तके वामनपुराणे ।

(२) क ख पुस्तकद्वये समागत्य ।

(३) क ख पुस्तकद्वये प्रसिद्धिपदं नास्ति ।

पूतो भवतीत्युपक्रम्य एवमेव फल्गुतीर्थे उत्तरमानसे मतङ्गवाप्यामिति विष्णुवचनात् ।

ततस्तत्र स्नान-तर्पणे कृत्वा ॐ अद्याक्षयपितृतृप्तिकामो मतङ्गवाप्यां श्राद्धमहङ्करिष्ये, इति सङ्कल्प्य प्रकृतपार्व्वणं कृत्वा मतङ्गवाप्या एव उत्तरदिगवस्थितं मतङ्गेशं नत्वा—

ॐ प्रमाणं देवताः सन्तु लोकपालाश्च साक्षिणः ।
[1]मयागत्य मतङ्गेऽस्मिन् पितॄणां निष्कृतिः कृता ॥

इति पठित्वा—ॐ पितृतरणकामः कूप-यूपयोर्मध्ये श्राद्धमहं करिष्ये इति सङ्कल्प्य पार्व्वणं कुर्य्यात् । कूपश्चैक एतद्वाप्या आग्नेयकोण-क्षेत्रमध्येऽवटरूपोऽस्ति तत्तीरे च श्राद्धं पिण्डदानं वा पतितस्यापि किन्तु तत्र गर्भहन्तृ-गुरुतल्पग इत्येवं निर्द्देशः कार्य्यः । ततो धर्म्मं धर्म्मेश्वरं महाबोधितरुञ्च यथाक्रमं स्वर्गकामो नमेदिति ।

इति पञ्चतीर्थीदिनाग्रिमदिनकृत्यम् ।

अथ पञ्चतीर्थीदिनोत्तरतृतीयदिनकृत्यम् ।

तत्र वायुपुराणे,

तृतीये ब्रह्मसरसि श्राद्धं कुर्य्यात् सपिण्डकम् ।
स्नानं करोमि तीर्थेऽस्मिन् ऋणत्रयविमुक्तये ॥

---

(१) ख पुस्तके समागत्य ।

श्राद्धाय पिण्डदानाय तर्पणायात्मशुद्धये ।
तत्कूप-यूपयोर्मध्ये कुर्व्वंस्तारयते पितॄन् ॥
स्नानं कृत्वोच्छ्रितो यूपो ब्रह्मणो यूप इत्यतः ।
कृत्वा ब्रह्मसरःश्राद्धं ब्रह्मलोकं नयेत् पितॄन् ॥
गोप्रचारसमीपस्था आम्रा ब्रह्मप्रकल्पिताः ।
तेषां सेचनमात्रेण पितरो मोक्षगामिनः ॥
आम्रं ब्रह्मशिरोद्भूतं[१] सर्व्वदेवमयं विभुम् ।
विष्णुरूपं प्रसिञ्चामि पितॄणाञ्चैव मुक्तये ॥

आम्राश्च सिक्ताः पितरश्च तृप्ताः
[२]एकक्रिया द्व्यर्थकरी प्रसिद्धा ।
आम्रस्य मूले सलिलं ददानो
नोपेक्षणीयो विबुधैर्मनुष्यः ॥

यूपं प्रदक्षिणीकृत्य वाजपेयफलं लभेत् ।
ब्रह्माणञ्च नमस्कृत्य पितॄन् ब्रह्मपुरं नयेत् ॥
ॐ नमो ब्रह्मणेऽजाय जगज्जन्मादिकारिणे ।
भक्तानाञ्च पितॄणां हि तारकाय नमोऽस्तु ते ॥
ततो यमबलिं दद्यात् मन्त्रेणानेन संयतः ।
यमराज-धर्मराजौ निश्चलार्थं हि संस्थितौ ॥
ताभ्यां बलिं प्रयच्छामि पितॄणां मुक्तिहेतवे ।
ततः श्वानबलिं दद्यात् मन्त्रेणानेन नारद ॥

---

(१) क ख पुस्तकद्वये ब्रह्मसरोद्भूतम् ।

(२) ग पुस्तके एका क्रिया ।

वैवस्वतकुलोद्भूतौ द्वौ श्याव-शवलौ शुनौ ।
ताभ्यां बलिं प्रयच्छामि रक्षेतां पथि सर्व्वदा ॥
ततः काकबलिं दत्वा पुनः स्नानं समाचरेत् ।
ऐन्द्र-वारुण-वायव्या याम्या वै नैर्ऋतास्तथा ॥
वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयोज्झितम् ।

सपिण्डकमिति अक्षय्यपिण्डसहितमित्यर्थः ।

तदिति स्नानं कृत्वा यूप-कूपयोर्मध्ये तच्छ्राद्धं कुर्व्वन् पितॄं-स्तारयति इत्यर्थः । कृत्वेति—ब्रह्मसरसि श्राद्धं कृत्वा पितॄन् ब्रह्म-लोकं नयेदित्यर्थः । अनयोस्तु फलयोः समुच्चय एकत्वेवा-न्वयात्[1] । गोप्रचारेति—आम्रमित्यादिश्लोकं पठित्वा आम्रसेकः कार्य्यः । स च शिष्टाचारात् ब्रह्मसरोजलेन दर्भैश्चेति । ॐ नमो ब्रह्मण इत्यादि ब्रह्मनमस्कारमन्त्रः । यमराजेत्यादिः—यमबलि-मन्त्रः । वैवस्वत इत्यादिः—श्वबलिमन्त्रः । ऐन्द्र इत्यादिः काकबलिमन्त्रः ।

तदयं प्रयोगः—

पञ्चतीर्थीदिनोत्तरतृतीयदिने फल्गुतीर्थे देवार्च्चनान्तं कर्म्म कृत्वा ब्रह्मसरो गत्वा ॐ अद्य पापक्षयकामोऽस्मिन् ब्रह्मसरसि स्नानमहं करिष्ये—इति सङ्कल्प्य प्रकृतमन्त्रान्ते—

ॐ स्नानं करोमि तीर्थेऽस्मिन् ऋणत्रयविमुक्तये ।
श्राद्धाय पिण्डदानाय तर्पणायात्मशुद्धये ॥

इति पठित्वा तर्पणञ्च कृत्वा ।

---

(१) ग पुस्तके आम्नानात् ।

ॐ अद्य पितृब्रह्मलोकनयनकामो ब्रह्मकूप-यूपयोर्मध्ये श्राद्धमहं करिष्ये । इति सङ्कल्प्य द्वादशदैवतं नवदैवतं षड्दैवतं वा श्राद्धं कृत्वा उत्तरमानसादक्षय्यपिण्डं दत्त्वा—ॐ पितृमोक्षकामो ब्रह्मकल्पिताम्रसेचनमहं करिष्ये । इति सङ्कल्प्य—

'ॐ आम्रं ब्रह्मसरोद्भूतं[1] सर्व्वदेवमयं विभुम् ।
विष्णुरूपं प्रसिञ्चामि पितॄणाञ्चाथ मुक्तये ॥

इति पठित्वा कुशत्रयेणाचारात् ब्रह्मसरोजलेन गोप्रचारसमीपस्थान् ब्रह्मकल्पितानाम्रान् सिञ्चेत् ।

ततः—ॐ अद्य वाजपेयजन्यफलसमफलप्राप्तिकामो ब्रह्मयूपप्रदक्षिणमहं करिष्ये । इति सङ्कल्प्य प्रदक्षिणं कुर्य्यात् ।

ततः—'ॐ पितृब्रह्मपुरगमनकामो ब्रह्मनमस्कारमहं करिष्ये इति सङ्कल्प्य—

ॐ नमो ब्रह्मणेऽजाय जगज्जन्मादिकारिणे ।
भक्तानाञ्च पितॄणां हि तारकाय नमोऽस्तु ते ॥

इति पठित्वा ब्रह्मसरोवायव्यकोणस्थं ब्रह्माणं प्रणमेत् ।

ततः—ॐ यमराज-भ्रमराजौ निश्चलार्थं हि संस्थितौ[2] ।
ताभ्यां बलिं प्रयच्छामि पितॄणां मुक्तिहेतवे ॥ इति पठित्वा ॐ यमायैष बलिर्नम इत्यनेन कुशोदकेन देववत् यमबलिं दद्यात् । ततः—

ॐ वैवस्वतकुलोद्भूतौ द्वौ श्याव-शबलौ शुनौ ।

(१) क पुस्तके रसोद्भूतम् ।

(२) ग पुस्तके स्थिरीकृतौ ।

ताभ्यां पिण्डं प्रयच्छामि रक्षेतां पथि सर्व्वदा ॥ इति पठित्वा

ॐ श्वन एष बलिर्नमः—इति देववद्दर्भोदकेन श्वबलिं दद्यात् । ततः—

ॐ ऐन्द्र-वारुण-वायव्या याम्या वै नैर्ऋतास्तथा ।

वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयोज्झितम् ॥

इति पठित्वा "काकेभ्य एष बलिर्नमः" दर्भोदकेन देवबलिवत् काकबलिं दद्यात् । श्लोकेनैव यम-श्व-काकबलयो देया न तु वाक्येनापीत्यन्ये । काकबल्यनन्तरन्तु स्नानम् ।

इति पञ्चतीर्थीदिनोत्तरतृतीयदिनकृत्यम् ।

अथ पञ्चतीर्थीदिनोत्तरचतुर्थदिनकृत्यम् ।

तत्र वायुपुराणे—

फल्गुतीर्थे चतुर्थेऽह्नि स्नानादिकमथाचरेत् ।

गयाशिरस्यथ श्राद्धं पदे कुर्य्यात् सपिण्डकम् ॥

साक्षाद्गयाशिरस्तत्र फल्गुतीर्थाश्रयं कृतम् ।

क्रौञ्चपादात् फल्गुतीर्थं यावत् साक्षाद्गयाशिरः ॥

गयाशिरो[१] नगाद्याश्च साक्षात्तत् फल्गुतीर्थकम् ।

मुखं गयासुरस्यैतत् स्नात्वा श्राद्धमथाक्षयम् ॥

आद्यो गदाधरो देवो व्यक्ताऽव्यक्तात्मना स्थितः ।

विष्णुादिपदरूपेण पितॄणां मुक्तिहेतवे ॥

---

(१) ग पुस्तके—शिरे ।

तत्र विष्णुपदं दिव्यं दर्शनात् पापनाशनम् ।
स्पर्शनात् पूजनाच्चैव पितॄणां [१]मोक्षदायकम् ॥
श्राद्धं सपिण्डकं कृत्वा कुलसाहस्रमात्मना ।
विष्णुलोकं समुद्धृत्य नयेत् विष्णुपदे नरः ॥
श्राद्धं कृत्वा रुद्रपदे नयेत् कुलशतं नरः ।
[२]सहात्मना शिवपुरं तथा ब्रह्मपदे नरः ॥
ब्रह्मलोकं कुलशतं समुद्धृत्य नयेत् पितॄन् ।
दक्षिणाग्निपदे श्राद्धी वाजपेयफलं लभेत् ॥
गार्हपत्यपदे श्राद्धी राजसूयफलं लभेत् ।
श्राद्धं कृत्वाहवनीये वाजिमेधफलं लभेत् ॥
श्राद्धं कृत्वा सत्यपदे ज्योतिष्टोमफलं [३]लभेत् ।
आवसथ्यपदे श्राद्धी सोमलोकमवाप्नुयात् ॥
श्राद्धं कृत्वा चन्द्रपदे चन्द्रलोकं नयेत् पितॄन् ।
श्राद्धी सूर्य्यपदे पञ्च पापिनोऽर्कपुरं नयेत् ॥
सर्व्वेषां काश्यपं श्रेष्ठं विष्णो रुद्रस्य वै पदम् ।
ब्रह्मणश्च पदञ्चापि श्रेष्ठं तत्र प्रकीर्त्तितम् ॥
प्रारम्भे च समाप्तौ च तेषामन्यतमं स्मृतम् ।
श्रेयस्करं भवेत्तत्र श्राद्धकर्त्तुश्च नारद ॥

---

(१) मूले दत्तमक्षयम् ।

(२) ग पुस्तके अत्र श्लोकान्तरम्—
श्राद्धं कृत्वाऽगस्त्यपदे ब्रह्मलोकं नयेत् पितॄन् ।
अन्येषाञ्च पदे श्राद्धी पितॄन् ब्रह्मपुरं नयेत् ॥

(३) ख पुस्तके पतितमिदं पद्यम् ।

कश्यपस्य पदे दिव्ये [१]भरद्वाजमुनिः पुरा ।
श्राद्धं कृत्वोद्यतो दातुं पित्रादिभ्यश्च पिण्डकम् ॥
शुक्ल-कृष्णौ ततो हस्तौ पदमुद्भिद्य निर्गतौ ।
दृष्ट्वा हस्तद्वयं तत्र पितृसंशयमागतः ॥
ततः स्वमातरं शान्तां भारद्वाजस्तु पृष्टवान् ।
कश्यपस्य पदे कस्मिन् शुक्ले कृष्णेऽथवा करे ।
पिण्डो देयो मया मातर्जानासि[२] पितरं वद ॥

शान्तोवाच—

भारद्वाज[३]महाप्राज्ञ पिण्डं कृष्णाय देहि भो ।
भारद्वाजस्ततः पिण्डं दातुं कृष्णाय चोद्यतः ॥
श्वेतोऽदृश्योऽब्रवीत् पुत्रं देहि मह्यं ममौरसः ।
कृष्णोऽब्रवीत् क्षेत्रजस्त्वं ततो मे देहि पिण्डकम् ॥
शुक्लोऽब्रवीत् स्वैरिणीयं यतोऽतस्त्वं ममौरसः ।
[४]स्वैरिणी त्वब्रवीदादौ क्षेत्रिणे बीजिने ततः ॥
भारद्वाजस्ततः पिण्डं कश्यपस्य पदे ददौ ।
हंसयुक्तेन यानेन ब्रह्मलोकमुभौ गतौ ।
भीष्मो विष्णुपदे श्रेष्ठे आहूय तु पितॄन् स्वकान् ॥
श्राद्धं कृत्वा विधानेन पिण्डदानाय चोद्यतः ।
पितुर्विनिर्गतौ हस्तौ गयाशिरसि शान्तनोः ॥

---

(१) ग पुस्तके भारद्वाजो महामुनिः ।
(२) ख पुस्तके नाहं जानामि ।
(३) क पुस्तके महाभाग ।
(४) मूलपुस्तके स्वैरिण्यथाब्रवीद्दातुम् ।

भीष्मः पिण्डं ददौ भूमौ नाधिकारः करे यतः ।
शान्तनुः प्रहसंतुष्टः शास्त्रार्थे निश्चलो भवान् ॥
त्रिकालदृष्टिर्भवतु अन्ते विष्णुश्च ते गतिः ।
इच्छया मरणञ्चास्तु इत्युक्त्वा मुक्तिमागतः ॥
रामो रुद्रपदे रम्ये पिण्डार्पणकृतोद्यमः ।
पिता दशरथः स्वर्गात् प्रसार्य्य करमागतः ॥
नादात् पिण्डं करे रामो ददौ रुद्रपदे ततः ।
शास्त्रार्थातिक्रमाद्भीतं रामं दशरथोऽब्रवीत् ॥
तारितोऽहं त्वया पुत्र रुद्रलोकोऽह्यभून्मम ।
पदे पिण्डप्रदानेन हस्ते तु स्वर्गतिर्न हि ॥
त्वञ्च राज्यं चिरं कृत्वा पालयित्वा प्रजादिकम् ।
यज्ञान् सदक्षिणान् कृत्वा विष्णुलोकं गमिष्यसि ॥
सहाऽयोध्याजनैः सर्व्वैः कृमिकीटादिभिः सह ।
इत्युक्त्वा दशरथः पुत्रं रुद्रलोकं परं ययौ ।
गयाशिरसि यः पिण्डं येषां नाम्ना तु निर्व्वपेत् ।
नरकस्था दिवं यान्ति स्वर्गस्था मोक्षमाप्नुयुः ॥
गयाशिरसि यः पिण्डं शमीपत्रप्रमाणतः ।
कन्द-मूल-फलाद्यैर्वा दद्यात् स्वर्गं नयेत् पितॄन् ॥
पदानि यत्र दृश्यन्ते विष्ण्वादीनां तदग्रतः ।
श्राद्धं कृत्वा सपिण्डञ्च तेषां लोकं नयेन्नरः ॥

---

(५) क पुस्तके—क्रमातीतम् ।

सर्व्वत्र मुण्डपृष्ठाद्रिः पदैरेभिः सुलक्षितः।
प्रयान्ति पितरः सर्व्वे ब्रह्मलोकमनामयम्॥
दैत्यसुरस्य यच्छिरो गदया तद्द्विधा कृतम्।
यतः प्रक्षालिता तीर्थे गदालोलन्ततदा स्मृतम्॥

साक्षादिति प्रशस्तमित्यर्थः। क्रौञ्चपादः मुण्डपृष्ठे।

क्रौञ्चरूपेण हि मुनिर्मुण्डपृष्ठे तपोऽकरोत्।
तस्य पादा(दोऽ)ङ्कितो यस्मात् क्रौञ्चपादस्ततः स्मृतः॥

इति वायुपुराणात्।

पञ्चपापिन इति पञ्चमहापातकिनोऽपीत्यर्थः।

अन्येषां क्रौञ्चादीनां पदानि चतुर्युगं तदुक्तं वायुपुराणे—

विष्णोः पदं रुद्रपदं ब्रह्मणः पदमुत्तमम्।
काश्यपस्य पदं दिव्यं द्वौ हस्तौ यत्र निर्गतौ॥
पञ्चाग्नीनां पदान्यत्र इन्द्राऽगस्त्यपदे परे।
रवेश्च कार्त्तिकेयस्य क्रौञ्चमातङ्गकस्य च।
मुख्यलिङ्गानि सर्व्वाणि पदानीति निबोधत॥

श्रेयस्करमिति श्रेयो मोक्षः, श्रेयो निःश्रेयसामृतमिति कोषात्।

एवं पदे श्राद्धात् कर्त्तुरपि मोक्षो भवतीत्यर्थः।

तदयमत्र प्रयोगः—

ॐ अद्य दशलक्षाश्वमेधजन्यफलसमफलप्राप्तिकामः फल्गुतीर्थे स्नानमहं करिष्ये इति सङ्कल्प्य प्रकृतस्नानविध्यन्ते—

ॐ फल्गुतीर्थे पुण्यजले करोमि स्नानमादृतः।
पितॄणां विष्णुलोकाय भुक्ति-मुक्तिप्रसिद्धये॥

इति मन्त्रं पठित्वा फल्गुतीर्थे मज्जेत्। ततस्तर्पणं तत्र पितृ-तर्पणादौ स्वधोदीरणानन्तरं पितरं प्रीणयामीति प्रयोज्यम्। ततः-पदेषु श्राद्धम्। तत्र यद्यपि ब्रह्म-विष्णु-रुद्र-कश्यपपदानामन्यतम-मेवारम्भसमाप्त्योर्विहितं तथापि रुद्रपदे आरम्भः—

फल्गुतीर्थे चतुर्थेऽह्नि स्नात्वा देवादितर्पणम्।
कृत्वा श्राद्धं गयाशीर्षे कुर्य्याद्रुद्रपदादिह॥

इति गारुड़ात्।

तथाचादौ रुद्रपदसमीपं गत्वा ॐ अद्यापुनरावृत्तिकामो रुद्रपदस्पर्शनमहं करिष्ये।

इति सङ्कल्प्य स्पृष्ट्वा श्राद्धमारभ्य तद्द्रव्याणि प्रोक्ष्य ॐ अद्यात्म-सहित कुलशतशिवपुरनयनकामो रुद्रपदे श्राद्धमहं करिष्ये इति सङ्कल्प्य द्वादशदैवतं नवदैवतं षड्दैवतं वा श्राद्धं कुर्य्यात्।

ततो विष्णुपदसमीपं गत्वा ॐ अद्य पापक्षयकामो विष्णुपद-दर्शनमहं करिष्ये इति सङ्कल्प्य विष्णुपदं दृष्ट्वा—ॐ अद्य पितृमोक्ष-कामो विष्णुपदस्पर्शनमहं करिष्ये इति सङ्कल्प्य तत्स्पृष्ट्वा ॐ अद्य पितृमोक्षकामो विष्णुपदे विष्णुपूजनमहं करिष्ये इति सङ्कल्प्य विष्णुप्रकाशकमन्त्रेण विष्णुं पञ्चोपचारैः सम्पूज्य ततः श्राद्धीयद्रव्याणि पुण्डरीकाक्षस्मरणपूर्व्वकं कुशोदकेन सम्प्रोक्ष्य—ॐ अद्यात्मसहित कुलसहस्रोद्धरणपूर्व्वकविष्णुलोकनयनकामो विष्णुपदे श्राद्धमहं करिष्ये—

इति सङ्कल्प्य द्वादशदैवतं नवदैवतं षड्दैवतं वा सविश्वेदेव—पार्व्वणश्राद्धं कृत्वा तद्वेदिदक्षिणतः—उपविश्य इत्युपक्रम्य ऋण-

त्रयादित्यन्तं प्राङ्मुखः प्रेतशिलास्थानीयं कर्म्म कुर्य्यात् । सन्न्यासिनान्तु विष्णुपदे दण्डस्पर्शनं कर्त्तव्यम् ।

दण्डं संस्पर्शयेन्निस्तुर्गयां गत्वा न पिण्डदः ।
न्यस्य दण्डं विष्णुपदे मुच्यते पितृभिः सह ॥

इति वायुपुराणात् ।

तत ॐ अद्यात्मसहितकुलशतनरकोद्धरणपूर्व्वक ब्रह्मलोक-नयनकामो ब्रह्मपदे श्राद्धमहं करिष्ये इति सङ्कल्प्य तत्र रुद्रपदवत् श्राद्धं कुर्य्यात् ।

अथ दक्षिणाग्निपदे श्राद्धस्य वाजपेयफलम् । गार्हपत्यपदे श्राद्धस्य राजसूयफलम् । कार्त्तिकेयपदे श्राद्धस्य पितृशिवलोक नयनं फलम् ।

क्रौञ्चपदे श्राद्धस्य पितृब्रह्मलोकनयनफलम् । कश्यपपदे श्राद्धस्य पितृब्रह्मलोकनयनं फलम् । श्राद्धोपसंहारस्तु कश्यपपदे कर्त्तव्यः ।

अथ गयाशिरसि—ॐ अद्यामुकगोत्रस्यामुकशर्म्मणः स्वर्ग-प्राप्तिकामो गयाशिरसि पिण्डदानमहं करिष्ये इति सङ्कल्प्य स्व-सूत्रोक्तरीत्याऽवनेजनादि पिण्डसमुत्थापनपर्य्यन्तं कर्म्म कुर्य्यात् ।

तत ॐ अद्यामुकगोत्रस्यामुकशर्म्मणो मोक्षप्राप्तिकामो गया-शिरसि पिण्डदानमहं करिष्ये इति सङ्कल्प्यावनेजनादि—पिण्ड-समुत्थापनपर्य्यन्तं कर्म्म कुर्य्यात् । एवं स्त्रीपिण्डोऽपि देयः ।

अत्र न सम्बन्ध्यादरो येषां नाम्नेति सामान्यशब्दस्वरसात् । एतच्च पिण्डदानं जिह्वालोल-मधुस्रवा-मुण्डपृष्ठोत्तरमानसदक्षिण-मानसाभ्यन्तरे गदाधरावासादिप्रदेशे क्वापि कर्त्तव्यम् ।

क्रौञ्चपादात् फल्गुतीर्थं यावत् साक्षाद्गयाशिरः।

इति वचनात्।

क्रौञ्चपदस्य मुण्डपृष्ठे।

पदाङ्कितां प्रेतशिलामधिकृत्य वायुपुराणे—

तां दृष्ट्वा सर्व्वलोकस्य महापापौघपातकी[1]।

पूतः कर्म्माधिकारी च श्राद्धकृद्ब्रह्मलोकभाक्॥

शिलास्थितेषु तोयेषु[2] स्नात्वा कृत्वाऽथ तर्पणम्।

श्राद्धं सपिण्डकं येषां ब्रह्मलोकं प्रयान्ति ते॥

स्थास्यन्ति च मरिष्यन्ति यान्तु ब्रह्मपुरीं नराः।

जरायुजा अण्डजा वा देहं त्यक्त्वा शिलोपरि।

गच्छन्ति विष्णुसायुज्यं कुलैः सप्तशतैः सह॥

अथ पञ्चतीर्थ्युत्तरपञ्चमदिनकृत्यम्।

तत्र वायुपुराणे—

पञ्चमेऽह्नि गदालोले कृत्वा स्नानादि पूर्व्ववत्।

श्राद्धं सपिण्डकं कुर्य्यात्ततोऽक्षयवटे नरः॥

तत्र श्राद्धादिकं कृत्वा पितॄन् ब्रह्मपुरं नयेत्।

ब्रह्मप्रकल्पितान् विप्रान् भोजयेत् पूजयेदथ॥

(१) ग पुस्तके महापापोऽतिपातकी।

(२) ख पुस्तके तीर्थेषु।

कृतश्राद्धोऽक्षयवटे अनेनैव प्रयत्नतः[१]।
दृष्ट्वा नत्वाऽथ सम्पूज्य वटेशञ्च[२] समाहितः॥
पितॄन् नयेद्ब्रह्मपुरमक्षयञ्च सनातनम्।
गयायां धर्म्मपृष्ठे च सरसि ब्रह्मणस्तथा।
गयाशीर्षेऽक्षयवटे पितॄणां दत्तमक्षयम्॥

तथा—

गदालोले महातीर्थे [३]गदाप्रक्षालने वरे।
स्नानं करोमि शुद्ध्यर्थमक्षयाय स्वरामये॥

तथा चात्र पापक्षयः स्वर्गप्राप्तिश्च फलम्।

मन्त्रस्तु—

एकार्णवे वटस्याग्रे यः शेते योगनिद्रया।
[४]कामरूपधरस्तस्मै नमस्ते योगशायिने॥
संसारवृक्षशस्त्रायाऽशेषपापहराय च[५]।
[६]अक्षयब्रह्मदात्रे च नमोऽक्षयवटाय वै॥
कलौ माहेश्वरा लोका येन तस्माद्गदाधरः।
लिङ्गरूपोऽभवत्तञ्च वन्दे श्रीप्रपितामहम्॥

गदालोले इति-फल्गुप्रवाहे गदालोलं नाम तीर्थम्।

---

(१) क ख पुस्तकद्वये अनेनैव प्रमाणतः।

(२) ग पुस्तके वटे शश्वत्।

(३) क पुस्तके पाद— ।

(४) क पुस्तके बाल— ।

(५) क पुस्तके पापक्षयाय च। ख पुस्तके सर्व्वपापहराय च।

(६) मूलपुस्तके अक्षयाय ब्रह्मदात्रे।

तदुक्तं वायुपुराणे—

हेत्यसुरस्य च[1] शिरो गदया यद्द्विधा कृतम् ।
यतः प्रक्षालिता तीर्थं गदालोलं ततः स्मृतम् ॥

हेतिनामकस्यासुरस्य शिरश्छित्त्वा गदाधरेण यत्र गदा प्रक्षालिता तद्गदालोलं नाम तीर्थमित्यर्थः ।

हेत्युपाख्यानन्तु वायुपुराणे—

हेती रक्षो ब्रह्मपुत्र[2] स्तपस्तेपेऽद्भुतं महत् ।
ब्रह्मादीन् तपसा तुष्टान् वरं वव्रे वरप्रदान् ॥
दैत्यादितियैः शस्त्राद्यैर्विविधैर्मनुजैरपि ।
कृष्णेशानादिचक्राद्यैरवध्यः स्यां महाबलः ॥
तथेत्युक्त्वाऽन्तर्हितास्ते हेतिर्देवानथाजयत् ।
इन्द्रत्वमकरोद्धेतिः सुरा[3] ब्रह्म-हरादयः ॥
हरिञ्च शरणं जग्मुरूचुर्हेतिं जहीति च ।
ऊचे हरिरवध्योऽयं हेतिर्देवासुरैः सुराः ॥
ब्रह्मास्त्रं मे प्रयच्छध्वं हेतिं हन्यां हि येन तम् ।
इत्युक्तास्ते ततो देवा विष्णवे तां गदां ददुः ॥
उपेन्द्र त्वं जहीहीत्थं हेतिं प्रोचुरजादयः ।
दधार तां गदामादौ देवैरुक्तो गदाधरः ।
गदया हेतिमाहत्य देवेभ्यस्त्रिदिवं ययौ ॥

---

(१) क पुस्तके हेतेरसुरस्य ।
(२) क पुस्तके ब्रह्मवपुः ।
(३) ग पुस्तके भीताः ।

तत्र च गदालोलतीर्थे स्नानम्। अत्र च प्रकृतसकलमन्त्र-पाठानन्तरं गदालोल इत्यादि पठित्वा मज्जनं कार्य्यमित्यर्थः। तत्रेति गदालोले श्राद्धस्य पिण्डदानस्य वा पितृब्रह्मलोकनयनं फलमित्यर्थः। ब्रह्मेति-तत्रादावक्षयवटतले श्राद्धं तस्य पितॄणा-मक्षयतृप्तिः फलम्। ततो ब्रह्मप्रकल्पितसन्तानजब्राह्मणभोजनं तस्य पितृब्रह्मलोकनयनं फलम्।

ततो वटेशदर्शन-नति-पूजाः। तत्रापि प्रत्येकं पितृब्रह्मलोक-नयनमेव फलमित्यर्थः। एतन्नमस्कारे तु एकार्णव इत्यादिमन्त्रः। ततोऽक्षयवटनमस्कारे तु प्रावृत्तिक[1]क्रमात् संसारवृक्ष इत्यादि-र्मन्त्रः। नयेदिति प्रपितामहनमस्कारस्य पितृरुद्रपदनयनं फलम्। तस्य नमस्कारे "कलौ माहेश्वरा लोकाः" इत्यादिर्मन्त्रः।

तदित्थमत्र प्रयोगः—

कृतदेवार्च्चनान्तकर्म्मा गदालोलं गत्वा—तत्र ॐ अद्य पापक्षय-स्वर्गप्राप्तिकामो गदालोले स्नानमहं करिष्ये। इति सङ्कल्प्य स्नायात्।

तत्र प्रकृतमन्त्रपाठानन्तरम्,—

ॐ गदालोले महातीर्थे गदाप्रक्षालने वरे।
स्नानं करोमि शुद्ध्यर्थमक्षयाय सुरालये॥

इति मन्त्रं पठित्वा मज्जेत्। ततस्तर्पणम्।

तत ॐ अद्य पितृब्रह्मलोकनयनकामो गदालोले श्राद्धमहं करिष्ये—इति सङ्कल्प्य श्राद्धं कुर्य्यात्। यदि पिण्डदानमात्रं

(१) ख पुस्तके प्राकपूक्त।

क्रियते तदाऽप्येवमेव सङ्कल्पः । पिण्डदानन्तु स्वसूत्रोक्तविधिना कार्य्यम् । ततोऽक्षयवटं गत्वा तन्मूलसहिते आचारादुत्तरदिग्भागे-ॐ अद्य पितॄणामक्षयतृप्तिकामोऽक्षयवटे श्राद्धमहं करिष्ये—इति सङ्कल्प्य तत्र श्राद्धं कुर्य्यात् ।

तत ॐ पितृब्रह्मलोकनयनकामो ब्रह्मप्रकल्पितान् ब्राह्मणानहं भोजयिष्ये । इति सङ्कल्प्य तान् त्रीन् भोजयेत् । तदलाभे ब्राह्मणान्तरमपि । ॐ अद्य कोटिब्राह्मणभोजनजन्यफलसमफलप्राप्तिकामोऽक्षयवटे एकं ब्राह्मणमहं भोजयिष्ये । इति सङ्कल्प्य तत्रैकं ब्राह्मणं भोजयेत् ।

तदुक्तं वायुपुराणे—अक्षयवटप्रकरणे--

एकस्मिन् भोजिते विप्रे कोटिर्भवति भोजिता । इति ।

तत ॐ अद्य पितृब्रह्मलोकनयनकामो वटेशदर्शनमहं करिष्ये । इति सङ्कल्प्य वटेशं प्रतिमारूपं पश्येत् । अनेनैव क्रमेण नतिं पूजाञ्च कुर्य्यात् । तथा तत्रैव—

उपोषितोऽथ गायत्रीतीर्थे महानदीस्थिते[1] ।
गायत्र्याः पुरतः स्नातः प्रातः सन्ध्यां समाचरेत् ॥
श्राद्धं सपिण्डकं कृत्वा नयेद्ब्रह्मण्यतां कुले[2] ।
तीर्थे स मुच्यते स्नात्वा सावित्र्याः पुरतो नरः ॥
सन्ध्यामुपास्य मध्याह्ने नयेत् कुलशतं दिवम् ।
प्राची-सरस्वतीस्नातः सरस्वत्यास्ततोऽग्रतः ॥

---

(१) मूले—नद्यां समाहितः ।

(२) मूले—नयेद्ब्रह्म स्वकान् पितॄन् । क पुस्तके भेदब्राह्मण्यतां कुले ।

सन्ध्यामुपास्य सायाह्ने नयेत् सप्तशतां कुलम् ।
बहुजन्मकृतात् सन्ध्यालोपान्मुक्तस्त्रिसन्ध्यकृत् ॥
विशालायां लेलिहाने तीर्थे च भरताश्रमे ।
पदाङ्किते मुण्डपृष्ठे गदाधरसमीपतः ॥
तीर्थे चाकाशगङ्गायां गिरिकर्णमुखेषु च ।
[1]श्राद्धदः पिण्डदो ब्रह्मलोकं कुलशतं नयेत् ॥
स्नातो गोदावैतरण्यां त्रिःसप्तकुलमुद्धरेत् ।
देवनद्यां गोप्रचारे श्राद्धदः स्वर्नयेत् पितॄन् ॥
पुष्करिण्यां घृतकुल्यां मधुकुल्यां तथैव च ।
पुष्करण्यां गदालोले तीर्थे च मकरे [2]तथा ॥
कोटितीर्थे रुक्मकुण्डे[3] पिण्डदः स्वर्नयेत् पितॄन् ।
मार्कण्डेयेश-कोटीशौ नत्वा स्यात् पितृतारकः ॥

पाण्डुशिलां प्रस्तुत्य तत्रैव—

युधिष्ठिरस्तु तस्यां हि श्राद्धं कर्त्तुं ययौ मुने ।
शिलायां पिण्डदानेन प्रहृष्टो व्यासनन्दनः ॥
वरं ददौ स्वपुत्राय राज्यं कुरु महीतले ।
अकण्टकन्तु सम्पूर्णं त्वं मे त्राताऽसि पुत्रक ।
स्वर्गं व्रज शरीरेण भ्रातृभिः परिवारितः ॥
दृष्टिमात्रेण सम्पूतान् नरकस्थान् दिवं नय ।
इत्युक्त्वा प्रययौ पाण्डुः शाश्वतं पदमव्ययम् ॥

---

(१) क पुस्तके स्नात्वाऽथ ।　　(२) क पुस्तके-दण्डे ।

(२) क पुस्तके चाम्बरके ।　　(३) ग पुस्तके रुक्मिणीये ।

घृतकुल्या मधुकुल्या देविका च महानदी ॥
शिलायां सङ्गता तत्र मधुस्रवा प्रकीर्त्तिता ।
अयुतं ह्यश्वमेधानां स्नानकृल्लभते नरः ॥
तर्पयित्वा पितृगणं कृत्वा श्राद्धं सपिण्डकम् ।
सहस्रकुलमुद्धृत्य नयेद्विष्णुपदं नरः ॥
उद्भिज्जाः स्वेदजा वाऽपि ह्यण्डजा ये जरायुजाः ।
मधुस्रवां समासाद्य मृता विष्णुपुरं ययुः ॥
दशाश्वमेधिके हंसतीर्थे [1]श्राद्धाद्दिवं नयेत् ।
दशाश्वमेध-हंसौ च नत्वा शिवपुरं व्रजेत् ॥
मतङ्गस्य पदे श्राद्धकृद् ब्रह्मलोकभाक् ।
निर्मथ्याग्नीन् शमीगर्भे विधिर्विष्ण्वादिभिः सह ॥
लेभे तीर्थन्तु यज्ञार्थं त्रिषु लोकेषु विश्रुतम् ।
मखसंज्ञं हि तत्तीर्थं पितॄणां मुक्तिदायकम् ।
तर्पणात् पिण्डदानाच्च स्नानकृन्मुक्तिमाप्नुयात् ॥
पितॄन् स्वर्गं नयेन्नत्वा रामेशाङ्गारकेश्वरौ ।
[2]गदाकूपे पिण्डदानादश्वमेधफलं लभेत् ॥
तस्मात् कूपाद् भस्मनाऽथ स्नानात्तारयते पितॄन् ।
धौतपादे निःचीरायाः[3] सङ्गमे स्नानकृन्नरः ॥
श्राद्धी नाम पुष्करिण्यां ब्रह्मलोकं नयेत् पितॄन् ।

---

(१) क पुस्तके श्राद्धी दिवम् ।
(२) क पुस्तके गया- ।
(३) क पुस्तके निःशल्यायाः ।

सुषुम्नायां महाकौश्यां त्रिःसप्तकुलमुद्धरेत् ।
स्नातो नत्वा वशिष्ठेशं तस्यास्तीरेऽश्वमेधभाक् ॥
पिण्डदो धेनुकारण्ये कामधेनुपदेषु च ।
स्नातो नत्वा कामधेनुं ब्रह्मलोकं नयेत् पितॄन् ॥
कर्द्दमाले गयानाभौ मुण्डपृष्ठसमीपतः ।
स्नात्वा श्राद्धी नयेत् स्वर्गं पितॄन् नत्वा च चण्डिकाम् ।
फल्गुतीर्थे श्मशानाख्यसङ्गमादीशमर्च्चय च ॥
गयागजो गयादित्यो गायत्री च गदाधरः ।
गया गयासुरश्चैव षड्गयं मुक्तिदायकम्[१] ॥
गयायान्तु वृषोत्सर्गात् त्रिःसप्तकुलमुद्धरेत् ।
यत्र यत्र स्थितो विप्र उदितो विजितेन्द्रियः ॥
आद्यं गदाधरं ध्यायन् श्राद्धपिण्डादि कारयेत् ।
कुलानां शतमुद्धृत्य ब्रह्मलोकं नयेद्ध्रुवम् ॥
ततो दध्योदनेनैव दत्त्वा नैवेद्यमुत्तमम् ।
जनार्द्दनाय देवाय समभ्यर्च्चय यथाविधि ॥
दद्यान्निक्षिप्य पिण्डांस्तु तच्छेषेणैव जीवताम् ।
दैत्यस्य मुण्डपृष्ठे तु यस्मात् सायं स्थिता शिला ॥
शिलाऽसौ मुण्डपृष्ठाद्रिः पितॄणां ब्रह्मलोकदः ।
रामे वनं गते शैलमारुह्य भरतः स्थितः ॥
पित्रे पिण्डादिकं दत्त्वा रामेशं स्थाप्य तत्र च ।
स्नात्वा नत्वा च रामेशं रामं सीतां समाहितः ॥

(१) क पुस्तके षड्गया मुक्तिदायिका ।

श्राद्धं पिण्डप्रदानञ्च कृत्वा विष्णुपुरं नयेत् ।
पितृभिः सह धर्म्मात्मा कुलानाञ्च शतैः सह ॥
शिलादक्षिणहस्ते च स्थापितः कुण्डपर्व्वतः ।
तत्र श्राद्धादिना सर्व्वान् पितॄन् ब्रह्मपुरं नयेत् ॥
कुण्डेनाथ तपस्तप्तं सीताद्रेर्दक्षिणे गिरौ ।
मतङ्गस्य पदे पुण्ये पिण्डदः स्वर्गयेत् पितॄन् ॥
वामहस्ते शिलायाश्च जयन्तो विधृतो[1] गिरिः ।
उदयाद्रिरिहानीतो ह्यगस्त्येन महात्मना ॥
स्थापितः पिण्डदस्तत्र पितॄन् ब्रह्मपुरं नयेत् ।
कुण्डमुद्यन्तकन्तत्र स्नात्वाऽलं तपसे कृतम्[2] ॥
ब्रह्मा तत्र च सावित्री-कुमाराभ्यां सह स्थितः ।
हाहा-हूहूप्रभृतयो गीतनादं प्रचक्रिरे ॥
स्नातस्तत्र च मध्याह्ने सावित्रीं समुपास्य च ।
कोटिजन्म भवेद्विप्रो धनाढ्यो वेदपारगः ॥
अगस्त्यस्य पदे स्नातः पिण्डदो ब्रह्मलोकगः ।
पितृभिः सह धर्म्मात्मा पूज्यमानो दिवौकसैः ॥
ब्रह्मयोनिं प्रविश्याथ निर्गच्छेद्यस्तु मानवः ।
परं ब्रह्म स यातीह विमुक्तो योनिसङ्कटात् ॥
नत्वा गयाकुमारञ्च ब्राह्मण्यं लभते नरः ।
सोमकुण्डाभिषेकाद्यैः सोमलोकं नयेत् पितॄन् ॥

---

(१) मूलपुस्तके तथाचोद्यन्तको गिरिः ।
(२) क पुस्तके कुण्डकस्तत्र चोद्यन्त आत्मनस्तपसे कृतः ।

बलिः काकशिलायाञ्च काकेभ्य ऋणमोचदः[१] ।
स्वर्गद्वारेश्वरं नत्वा स्वर्गाद्ब्रह्मपुरं नयेत् ॥
पिण्डदो व्योमगङ्गायां निर्म्मलः स्वर्नयेत्[२] पितॄन् ।
शिलायां दक्षिणे हस्ते भस्मकूटमधारयत् ॥
धर्म्मोऽजस्तत्र च हरस्तन्नाम समकारयत् ।
ततोऽसौ भस्मकूटाद्रिर्भस्मस्नानात्तु नाकदः ॥
वटो वटेश्वरस्तत्र स्थितश्च प्रपितामहः ।
उदग्रे[३] रुक्मिणीकुण्डं पश्चिमे कपिला नदी ॥
कपिलेशो नदीतीरे उमासोमसमागमे ।
कपिलायां नरः स्नात्वा कपिलेशं नमेद्यजेत् ॥
श्राद्धदः स्वर्गभागी स्यात् महेशीकुण्ड एव च ।
गौरी च मङ्गला तत्र सर्व्वसौभाग्यदाऽर्च्चिता ॥
जनार्द्दनो भस्मकूटे[४] तस्य हस्ते तु पिण्डदः ।
मन्त्रेण चात्मनोऽन्येषां सव्येनापि तिलैर्विना ॥
पिण्डश्च[५] दधिसम्मिश्रं सर्व्वे ते विष्णुलोकगाः ।
आत्मानं पितृभिः सार्द्धं विष्णुलोकं नयेन्नरः ॥
एष पिण्डो मया दत्तस्तव हस्ते जनार्दन ।
गयाशीर्षे[६] त्वया देयं मह्यं पिण्डं मृते मयि ॥

---

(१) क ख पुस्तके ऋणमोचदः ।
(२) क ख पुस्तके स्वर्गयेत् ।
(३) क पुस्तके तस्याग्रे ।
(४) क ख पुस्तके—कूपे ।
(५) मूलपुस्तके जीवताम् ।
(६) क पुस्तके अन्तकाले ।

यस्मै पिण्डो मया दत्तस्त्वामुद्दिश्य जनार्द्दन ।
देहि देव गयाशीर्षे तस्मै तस्मिन् स्थते शुभम्[1] ॥
जनार्द्दन नमस्तुभ्यं नमस्ते पितृरूपिणे ।
पितृपते नमस्तुभ्यं नमस्ते मुक्तिहेतवे ॥
गयायां पितृरूपेण स्वयमेव जनार्दनः ।
तं दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात् ॥
नमस्ते पुण्डरीकाक्ष ऋणत्रयविमोचन ।
लक्ष्मीकान्त नमस्तेऽस्तु नमस्ते पितृमोक्षद ॥
पुण्डरीकाक्षमभ्यर्च्य स्वर्गगः स्याज्जनार्द्दन ।
वामजानु सुसम्पात्य नत्वा भीमो जनार्द्दनम् ॥
श्राद्धं सपिण्डकं कृत्वा भ्रातृभिर्विष्णुलोकभाक् ।
शिलायां वामपादे[2] तु प्रेतकूटो गिरिर्धृतः ॥
धर्म्मराजेन पापाढ्यो गिरिः प्रेतशिलाश्रयः ।
पादेन दूरे निक्षिप्तः शिलायाः प्रेतभारतः[3] ॥
प्रेता धानुष्करूपेण करग्रहणकारकाः[4] ।
[5]पृथक्स्थिताश्च बहवो विघ्नकारिण एव च ॥
श्राद्धादिकरणं नृणां तीर्थे पितृविमुक्तिदम् ।
गतः शिलाद्रिसम्पर्कात् प्रेतकूटः पवित्रताम् ।
प्रेतकुण्डस्तु तत्रास्ते देवास्तत्र पदे स्थिताः ।

---

(१) क ख पुस्तकद्वये स्थते तु तम् ।
(२) मूले—दक्षिणे पादे ।
(३) ख पुस्तके पापभारतः ।
(४) ग पुस्तके—कानने ।
(५) ग पुस्तके पृष्ठे ।

श्राद्धपिण्डादिकृत् स्नातः प्रेतत्वान्मोचयेत् पितॄन् ।
कीकटेषु गया पुण्या पुण्यं राजगृहं वनम् ॥
च्यवनस्याश्रमः पुण्यो नदी पुण्या पुनःपुना ।
वैकुण्ठो लोहदण्डश्च गिरिकूटश्च शोभनः[१] ॥
श्राद्धपिण्डादिकृत्तत्र पितॄन् ब्रह्मपुरं नयेत् ।
शिलादक्षिणपादे तु गृध्रकूटो गिरिर्धृतः ॥
धर्म्मराजेन सुस्थैर्य्यकरणायाशु पावनः[२] ।
गृध्ररूपेण संसिद्धास्तपः कृत्वा महर्षयः ॥
अतो गिरिर्गृध्रकूटस्तत्र गृध्रेश्वरः शिवः ।
दृष्ट्वा गृध्रेश्वरं स्नात्वा याति शम्भोःपदं नरः ॥
तत्र गृध्रवटं नत्वा प्राप्तकालो दिवं व्रजेत् ।
ऋणमोक्षं पापमोक्षं शिवं दृष्ट्वा शिवं व्रजेत् ॥
आदिपादेन गिरिणा आक्रान्तश्च शिलोदरम् ।
तत्रास्ते गजरूपेण विघ्नेशो विघ्ननाशनः ॥
तं दृष्ट्वा मुच्यते विघ्नैः पितॄन् शिवपुरं नयेत् ।
गायत्रीञ्च गयादित्यं स्नातो दृष्ट्वा दिवं व्रजेत् ॥
ब्रह्माणं चादिपादस्थं दृष्ट्वा स्यात् पितृतारकः ।
नाभौ च पिण्डदो यस्तु पितॄन् ब्रह्मपुरं नयेत् ॥
नितम्बे मुण्डपृष्ठस्य अरविन्दवनन्त्वभूत् ।
मुण्डपृष्ठारविन्दाद्री दृष्ट्वा पापं विनाशयेत् ॥

(१) क पुस्तके शोणकः ।
(२) क ग पुस्तकद्वये—करणाय सुपावनः ।

क्रौञ्चरूपेण हि मुनिर्मुण्डपृष्ठे तपोऽकरोत् ।
तस्य पदाङ्कितो यस्मात् क्रौञ्चपादः प्रकीर्त्तितः ॥
स्नातो जलाशये तत्र नयेत् स्वर्गं कुलत्रयम् ॥

उपोषित इति पूर्व्वदिने कृतोपवासः। गायत्र्या इति गायत्री च गयाग्राममध्ये तत्सम्मुखप्राक्देशे महानद्यां गायत्री-तीर्थं तत्र स्नात्वा प्रातः सन्ध्योपासनं कार्य्यम्। सपिण्डकमिति श्राद्धं पूर्व्वोक्तपिण्डदानसहितं तत्र कार्य्यम् कुलब्रह्मलोकनयन-म्मात्र फलम् ।

इदन्तु चिन्त्यते—अत्र स्नान-सन्ध्यावन्दनयोः स्वातन्त्र्येण विहि-तत्वात् आरम्भनीयावत् साधनफलञ्च विश्वजिन्न्यायात् स्वर्ग इति श्रौत्योपक्रमः ।

तीर्थ इति सावित्र्याः पुरतो मध्याह्ने स्नात्वा सन्ध्योपासने कुलशत-स्वर्गनयनफलमित्यर्थः। प्राचीति—सरस्वत्यग्रे प्राच्यां सरस्वत्यां स्नात्वा सायंसन्ध्योपासने कुलसर्व्वज्ञतानयनं फल-मित्यर्थः। बह्विति सन्ध्यात्रयवन्दने बहुजन्मकृतसन्ध्यालोप-जनितपापविमुक्तिः फलमित्यर्थः। विशालायामिति विशालादि-तीर्थसप्तकाऽन्यतरस्मिन् श्राद्धे पिण्डदाने वा कुलशतब्रह्मलोक-नयनं फलमित्यर्थः। स्नात इति गोदायां वैतरण्याञ्च प्रत्येक-मेकविंशतिकुलोद्धारः फलमित्यर्थः। वैतरणी च भस्मकूटस्थित-देवनदीपूर्व्वतः। अत्र च सन्तरणे आचारप्राप्तमन्त्रः—

'याऽसौ वैतरणी नाम नदी त्रैलोक्यविश्रुता।

(१) क पुस्तके या सा ।

सा च तीर्णा महाभाग पितॄणां तारणाय वै ॥

अत्र च पित्रादिनरकोद्धरणकामनया गोदानमप्याचरन्ति । देवनद्यामिति—देवनद्यादिनवके पिण्डदाने प्रत्येकं पितृस्वर्गनयनमित्यर्थः । मार्कण्डेयेति मार्कण्डेयेशस्य कोटीशस्य च नमस्कारे प्रत्येकं पितृतारणं फलमित्यर्थः । दृष्टेति पाण्डुशिलादर्शने नरकस्थपितृपूतत्वस्वर्गनयनफलमित्यर्थः ।

इत्युक्तेति—दत्तश्राद्धस्य पाण्डोः शाश्वताव्ययपदस्मरणात् पाण्डुशिलाश्राद्धे तादृक्फलप्राप्तिः फलमित्यर्थः । पाण्डुशिला चेयं पितामहसमीपस्थ-चम्पकवने । घृतकुल्येति एताश्चतस्रः मुण्डपृष्ठदक्षिणभागे शिलासङ्गता मधुस्रवापदवाच्याः तस्याञ्च स्नानेऽश्वमेधायुतं पुण्यफलमित्यर्थः । तर्पणे सपिण्डकश्राद्धे च प्रत्येकं सहस्रकुलोद्धरणपूर्व्वकविष्णुलोकनयनं फलमित्यर्थः । उद्भिज्जा इति मधुस्रवायाः स्मरणे ।

दशेति—दशाश्वमेधिके हंसतीर्थे श्राद्धे च प्रत्येकं पितृस्वर्गनयनं फलम् ।

पितामहदक्षिणे महानद्यां दशाश्वमेधः । मतङ्गस्येति मतङ्गपदे श्राद्धकर्त्तुर्ब्रह्मलोकभावित्वं भवतीत्यर्थः । निर्मथ्येति—कुण्डस्नानात् कर्त्तुर्मुक्तिरेवं तर्पणात् पिण्डदानाच्च पितॄणां मुक्तिर्भवतीत्यर्थः ।

उद्यन्तपर्व्वतसमीपे मथो(ख)कुण्डे पितॄनिति—रामेश्वरस्य चाङ्गारकेश्वरस्य च नमस्कारे प्रत्येकं पितृस्वर्गनयनं फलम् । गयेति गयाकूपे दातुरश्वमेधफलप्राप्तिरित्यर्थः ।

तत्र च गदालोलतीर्थे स्नानम्। अत्र च प्रकृतसकलमन्त्र-पाठानन्तरं गदालोल इत्यादि पठित्वा मज्जनं कार्य्यमित्यर्थः। तत्रेति गदालोले श्राद्धस्य पिण्डदानस्य वा पितृब्रह्मलोकनयनं फलमित्यर्थः। ब्रह्मेति-तन्नादावक्षयवटतले श्राद्धं तस्य पितृणा-मक्षयतृप्तिः फलम्। ततो ब्रह्मप्रकल्पितसन्तानजब्राह्मणभोजनं तस्य पितृब्रह्मलोकनयनं फलम्।

ततो वटेशदर्शन-नति-पूजाः। तत्रापि प्रत्येकं पितृब्रह्मलोक-नयनमेव फलमित्यर्थः। एतन्नमस्कारे तु एकार्णव इत्यादिमन्त्रः। ततोऽक्षयवटनमस्कारे तु प्रावृत्तिक[1]क्रमात् संसारवृक्ष इत्यादि-मन्त्रः। नयेदिति प्रपितामहनमस्कारस्य पितृरुद्रपदनयनं फलम्। तस्य नमस्कारे "कलौ माहेश्वरा लोकाः" इत्यादिर्मन्त्रः।

तदित्थमत्र प्रयोगः—

कृतदेवार्च्चनान्तकर्म्मा गदालोलं गत्वा—तत्र ॐ अद्य पापक्षय-स्वर्गप्राप्तिकामो गदालोले स्नानमहं करिष्ये। इति सङ्कल्प्य स्नायात्।

तत्र प्रकृतमन्त्रपाठानन्तरम्,—

ॐ गदालोले महातीर्थे गदाप्रक्षालने वरे।
स्नानं करोमि शुद्ध्यर्थमक्षयाय स्वराप्तये॥

इति मन्त्रं पठित्वा मज्जेत्। ततस्तर्पणम्।

तत ॐ अद्य पितृब्रह्मलोकनयनकामो गदालोले श्राद्धमहं करिष्ये—इति सङ्कल्प्य श्राद्धं कुर्य्यात्। यदि पिण्डदानमात्रं

(१) ख पुस्तके प्राकपूर्क।

अत्र च प्रथमवर्षोत्तरं पतितादीनामपि पित्रादीनां श्राद्धं पिण्डदानञ्च तद्गतस्वर्गकामनया कर्त्तव्यम् ।

क्रियते पतितानान्तु गते संवत्सरे क्वचित् ।
देशधर्म्मप्रमाणत्वाद्गयाकूपेषु बन्धुभिः ।
मार्त्तण्डपादकूपे वा श्राद्धं हरिहरं स्मरन् ॥

इति ब्रह्मपुराणात् ।

स्मरन्निति व्यत्ययेन तृतीयार्थे प्रथमा ।

पतितास्तु ब्रह्मपुराणे—

शृङ्गि दंष्ट्रि नखि-व्याल विष वह्नि-स्त्रिया जलैः ।
आदरात् परिहर्त्तव्यः कुर्व्वन् क्रीड़ां मृतस्तु यः ।
नागानां विप्रियं कुर्व्वन् दग्धश्चाप्यथ विद्युता ।
निगृहीतः स्वयं राज्ञा चौरदोषेन कुत्रचित् ।
परदारान् रमन्तश्च द्वेषात्तत्पतिभिर्हताः ।
असमानैश्च सङ्कीर्णैश्चाण्डालाद्यैश्च विग्रहम् ।
कृत्वा तैर्निहतास्तथ चाण्डालादीन् समाश्रिताः ॥
गराग्निविषदाश्चैव पाषण्डाः क्रूरबुद्धयः
क्रोधात् प्रायं विषं वह्निं शस्त्रमुद्बन्धनं जलम् ।
गिरिवृक्षप्रपातञ्च ये कुर्व्वन्ति नराधमाः
कुशिल्पजीविनो ये च सूनालङ्कारकारिणः ।
मुखे भगाश्च ये केचित् क्लीवप्राया नपुंसकाः
ब्रह्मदण्डहता ये च ये चापि ब्राह्मणैर्हताः ।
महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः ॥ इति—

शृङ्गादिभिः क्रीड़ा दर्पेण, व्याल-विषाभ्यां क्रीड़ा जाङ्गलिकत्वाभिमानेन, वह्निना च मान्त्रिकत्वाभिमानेन स्त्रिया यौवनमदेन जलैर्बाहुसन्तरणादिना ।

विद्युतेति शोकादिभिर्विद्युत्पातमङ्गीकृत्य तद्देशं गतो हतो विद्युद्धतः । गरो नारिकेलजलकर्पूरघटितः पाकविशेषो विषप्रतिमः । पाषण्डास्त्रयीबाह्याः । क्रूरबुद्धयो यावज्जीवं परानिष्टचिन्तकाः । कुशिल्पिनः ब्राह्मणादयश्चर्म्मादिशिल्पजीवकाः । सूनालङ्कारकारिणः—ब्राह्मणादय एव सन्तो वधस्थानाधिकृता इति ।

तस्मादिति तत्कूपभस्मना स्नाने पितृणां नरकतारणं फलमित्यर्थः । धौतपाद इति धौतपादे निःक्षीरायाः सङ्गमे रामपुष्करिणीनामके स्नात्वा पित्रादिश्राद्धकरणे विशिष्ट एव पित्रादिब्रह्मलोकनयनं फलमित्यर्थः । सुषुम्नाया इति सुषुम्नायां श्राद्धस्य त्रिःसप्तकुलोद्धारः फलमित्यर्थः । सुषुम्ना गयाग्राममध्ये । स्नात इति वशिष्ठस्य तीर्थे तेन वशिष्ठकुण्डे स्नात्वा वशिष्ठेशनमस्कारेणाश्वमेधतुल्यं फलमित्यर्थः । [1]गृध्रकूटोत्तरे वशिष्ठाश्रमस्तत्र वशिष्ठकुण्ड-वशिष्ठेश्वरौ ।

पिण्डद इति धेनुकारण्ये पिण्डदानस्य तथा कामधेनुपदे पिण्डदानस्य तथा कामधेनुनमस्कारस्य च प्रत्येकं ब्रह्मलोकनयनं फलमित्यर्थः । कर्द्दमाल इति कर्द्दमाले गयानाभौ तथा मुण्डपृष्ठसमीपे स्नानपूर्व्वकश्राद्धे पितृस्वर्गनयनं फलं तथा चण्डिकानम-

(१) क पुस्तके गृध्रवटोत्तरे ।

स्कारेऽपीदं फलमित्यर्थः। फल्ग्विति—फल्ग्वीशस्य चण्डीशस्य सङ्गमेशस्य च नमस्कारे प्रत्येकं पितृस्वर्गनयनं फलमित्यर्थः।

गयागज इति एते षट् गयायां मुक्तिदायकाः। अत्र च पूजा-परत्वं प्रकरणात्। गया तु महानदी देवनदी उदीची कनखल-नन्दामध्यसर्व्वतीर्थनिरन्तरा। गयाशिरस्तु नगकूट-गृध्रकूटोत्तर[1]-मानसमध्यगतम्। गयायामिति—गयायां वृषोत्सर्गस्यैकविंशति-कुलोद्धारः फलम्।

यत्र यत्रेति गयायां यत्र कुत्रचित् प्रदेशे श्राद्धे पिण्डदाने च प्रत्येकं कुलशतस्योद्धारपूर्व्वक-ब्रह्मलोकनयनं फलमित्यर्थः। स्नात्वेति भरताश्रमे महानद्यां स्नात्वा रामेशं रामं सीताञ्च दृष्ट्वा "राम राम महाबाहो" इति मन्त्रं पठेदित्यर्थः। श्राद्ध-मिति तत्र रामेशसन्निधाने रामपदे पित्रादिकुलशतसहित-स्वविष्णुपदनयनकामनया श्राद्धं पिण्डदानञ्च कर्त्तव्यमित्यर्थः।

शिलेति शिलादक्षिणहस्ते कुण्डनामा पर्व्वतः स्थापितस्तत्र श्राद्धे पिण्डदाने च पितॄणां ब्रह्मपुरनयनं फलमित्यर्थः। मतङ्ग-स्येति सीताद्रिदक्षिणगिरौ मतङ्गपदे पिण्डदानात् पितृस्वर्गनयनं फलमित्यर्थः। वामहस्त इति शिलाया वामहस्ते उद्यन्त-पर्व्वते पिण्डदानात् पितृब्रह्मपुरनयनं भवतीत्यर्थः। कुण्ड-मुद्यन्तक इति तत्र उद्यन्तककुण्डे मध्याह्ने स्नात्वा सावित्रीनामक-मध्याह्नसन्ध्यावन्दने कोटिजन्मावच्छिन्नधनाढ्य—वेदपारगविप्रत्वं फलमित्यर्थः।

---

(१) क पुस्तके वटोत्तर।

अगस्त्यऽस्येति—पदे पिण्डदातुर्द्दिवौकोगणपूज्यमानपितृसहितब्रह्मलोकगमनं फलमित्यर्थः। ब्रह्मयोनिर्मिति योनिसङ्कटविमुक्तिपूर्व्वकपरब्रह्मगमनकामनया ब्रह्मयोनिप्रवेशनिर्गमौ कार्य्याविल्यर्थः। नत्वेति गयाकुमारनमस्कारे ब्राह्मण्यं फलमित्यर्थः। सोमेति सोमकुण्डे स्नान-तर्पण-पिण्डैः पितृसोमलोकनयनं फलमित्यर्थः। बलिरिति काकशिलायां काकबलिकर्त्तुः सद्यो मोक्षलाभ इति। स्वर्गेति स्वर्गद्वारेश्वरनमस्कारात् स्वर्ग-तदुत्तरब्रह्मलोकप्राप्तिरित्यर्थः। पिण्डद इति आकाशगङ्गायां पिण्डदानेन स्वनैर्मल्यपितृस्वर्गनयने भवतः। प्रेतशिलायामिति प्रेतशिलादक्षिणहस्ते भस्मकूटनामा पर्व्वतः—तत्र भस्मना स्नानात् स्वर्गो भवतीत्यर्थः।

वट इति—तत्रैवाद्रौ अक्षयवटेश्वर प्रपितामहाग्रे रुक्मिणीकुण्डं तत्पश्चिमे कपिलानाम्नी नदी तदुत्तरे कपिलेश्वरः। उमेति तस्यां नद्यां उमासोमसमागमे स्नात्वा कपिलेश्वरनमस्कारात् पूजातो वा फलं विश्वजिन्न्यायात् स्वर्ग इति। श्राद्धद इति—माहेश्वरीकुण्डे चकारात् रुक्मिणीकुण्डे च श्राद्धकर्त्तुः। गौरी चेति। तत्र माहेश्वरीकुण्डे मङ्गला तत्पूजनात् सर्व्वसौभाग्यप्राप्तिर्भवतीत्यर्थः। * * *

इति महामहोपाध्यायवाचस्पतिमिश्रविरचिते तीर्थचिन्तामणौ चतुर्थो गयाप्रकाशः॥ * ॥ * ॥

अथ वाराणसीमाहात्म्यम् ।

संसारिणो नरकपावकदह्यमाना-

नालोक्य मौलिनिहितेन[1] सुधाकरेण ।

या निर्म्ममे निखिलदुःखहरी हरेण

तामन्तरीक्षनगरीमनिशं स्मरामि ॥

मत्स्यपुराणे—ईश्वर उवाच ।

वाराणसी तु भुवनत्रयसारभूता

रम्या सदा मम पुरी गिरिराजपुत्रि ! ।

तत्रागता विविधदुष्कृतकारिणोऽपि

पापक्षये विरजसः प्रतिभान्ति मर्त्याः ॥

इदं गुह्यतमं क्षेत्रं सदा वाराणसी मम ।

सर्व्वेषामेव जन्तूनां हेतुर्मोक्षस्य सर्व्वदा ॥

स्कन्दपुराणे—

ब्रह्मघ्न-गोघ्न गुरुतल्पग-भिन्नवृत्त-

न्यासापहारि कुहकादिनिषिद्धवृत्तिः ।

संसारभूतदृढ़पाशविमु(यु)क्तदेही

वाराणसीं मम पुरीं समुपैतु लोकः ॥

क्षेत्रं ममेदं सुरसिद्धजुष्टं संप्राप्य मर्त्त्यः सुकृतप्रभावात् ।

ख्यातो भवेत् सर्व्वसुरासुराणां मृतश्च यायात्[2] परमं पदं सः ॥

---

(१) ग पुस्तके—मिलितेन ।

(२) क पुस्तके यो याति ।

क्षेत्रेऽस्मिन्निपतन्ति ये सुकृतिनो भक्ताः सदा मानवाः
पश्यन्तोऽन्वहमादरेण शुचयः सन्तः सदाऽमत्सराः ।
ते मर्त्या भवदुःखपाशरहिताः संशुद्धकर्म्मक्रियाः
भित्वा सम्भवबन्धजालगहनं विन्दन्ति मोक्षं पदम् ॥

अथ क्षेत्रमानम् ।

तत्र मत्स्यपुराणे—

[1]द्वियोजनमथार्द्धञ्च पूर्व्व-पश्चिमतः स्थितम् ।
अर्द्धयोजनविस्तीर्णं दक्षिणोत्तरतः स्थितम् ॥
वाराणसी नदी या तु या च शुष्कनदी तथा ।
भीष्मचण्डिकमारभ्य पर्व्वतेश्वरमन्तिके ॥

ब्रह्मपुराणे ब्रह्मवाक्यम्—

[2]वरणा चाप्यसिश्चैव द्वे नद्यौ सुरवल्लभे ।
अन्तराले तयोः क्षेत्रं भूमावपि विशेषतः ॥
पञ्चक्रोशप्रमाणन्तु क्षेत्रं दत्तं मया तव ।

स्कान्दपुराणे—

चतुःक्रोशं चतुर्दिक्षु क्षेत्रमेतत् प्रकीर्त्तितम् ।
योजनं विद्धि चार्व्वङ्गि मृत्युकालेऽमृतप्रदम् ॥

---

(१) मूलपुस्तके द्वियोजनन्तु तत्क्षेत्रं
(२) क पुस्तके वरुणा

अत्र कल्पभेदेन परिमाणभेदो द्रष्टव्यः। असिवरणा[1]योर्मध्यं वाराणसीक्षेत्रमिति तु नियम एव, तेनासितः पूर्व्वं वरणातः पश्चाद्वाराणसीति मन्तव्यम्।

तत्रैव—

अयनन्तूत्तरे ज्ञेयमिति चण्डेश्वरं मम।
दक्षिणं शङ्कुकर्णस्तु ॐकारन्तूत्तरं मम।
दशकोट्यस्तु तीर्थानां संविशन्त्यत्र पर्व्वणि॥

लिङ्गपुराणे—शिववाक्यम्—

पिङ्गला नाम या नाड़ी आग्नेयी सा प्रकीर्त्तिता।
शुष्का सरिच्च सा ज्ञेया लोलार्को यत्र तिष्ठति॥
इड़ानाम्नी तु या नाड़ी सा सौम्या सम्प्रकीर्त्तिता।
[2]वरणासीसमा ज्ञेया केशवो यत्र संस्थितः॥
आभ्यां मध्ये तु या नाड़ी सुषुम्ना सा प्रकीर्त्तिता।
मत्स्योदरी च सा ज्ञेया विषुवं तत्प्रकीर्त्तितम्॥

वाराणस्यान्तु पूर्व्वदिशि द्वारदेशे मित्रावरुणनामकं लिङ्गद्वयं "मित्रावरुणनामानौ द्वारदेशव्यवस्थितौ" इति लिङ्गपुराणात्।

एवञ्च लोलार्क-केशवयोः शुष्कनदी-वरणातीरस्थयोर्मध्यं मत्स्योदरीसंज्ञकनदीचिह्नितम्। असी(सि)वरणयोर्मध्यं वाराणसीक्षेत्रमिति वर्त्तुलार्थः।

---

(१) क पुस्तके सर्व्वत्र वरुणा।
(२) ग पुस्तके वरुणा नाम या।

मात्स्ये—

विमुक्तं न मया यस्मान्मोच्यते न[1] कदाचन ।
महत् क्षेत्रमिदं तस्मादविमुक्तमिति स्मृतम् ॥
प्रयागादपि तीर्थाग्र्यादिदमेव महत् स्मृतम् ।
अल्पायासेन चैवात्र मोक्षप्राप्तिः प्रजायते ॥

तथा तत्रैव—

नानावर्णा विवर्णाश्च चाण्डाला ये जुगुप्सिताः ।
किल्बिषैः पूर्णदेहाश्च प्रकृष्टैः पातकैस्तथा ।
भेषजं परमं तेषामविमुक्तं विदुर्बुधाः ॥
दुष्टान् वा दीनकृपणान् पापान् दुष्कृतकारिणः ।
देवोऽनुकम्पया सर्व्वान् नयत्यात्मपरां गतिम्[2] ॥

ब्राह्मे ब्रह्मवाक्यम्—

क्षेत्रमध्याद्यदा गङ्गा गमिष्यति सरित्पतिम् ।
तेन सा महती पुण्या पुरा रुद्र भविष्यति ॥
पुण्या चोदङ्मुखी गङ्गा प्राची चैव सरस्वती ।
उदङ्मुखी योजने द्वे गच्छते जाह्नवी नदी ॥
त एते विबुधाः सर्व्वे मया सह सवासवाः ।
उत्तमे वा समेष्यन्ति कपालं तत्र मोचय ॥
तस्मिन् तीर्थोत्तमे[3] गत्वा पिण्डदानेन वै पितॄन् ।
श्राद्धेषु प्रीणयिष्यन्ति तेषां लोकोत्तमा दिवि ॥

---

(१) क पुस्तके मोक्ष्यं ते न । (२) ग पुस्तके ह्याशु परं पदं ।
(३) क पुस्तके तीर्थे तु यः ।

अत्र चेत्रमध्यादिति वचनात् यद्यपि वाराणसीमध्ये गङ्गा-
वाह इत्यापाततः प्रतीयते तथापि—

वरणा चाप्यसिश्चैव द्वे नद्यौ सुरनिर्म्मिते ।
अन्तराले तयोः चेत्रं भूमावपि विशेषतः ॥

इति पूर्व्वलिखितवचनपर्य्यालोचनया असिवरणावाह्यस्य
वाराणसीचेत्रत्वाभावे सिद्धे चेत्रमध्यपदं चेत्रस्पर्शनमात्रपरम् ।
ग्राममध्ये गत इतिवत् ।

अथ वाराणसीप्रवेशफलम् ।

तत्र लैङ्गे—

ब्रह्महा योऽभिगच्छेत्तु अविमुक्तं कदाचन ।
तस्य चेत्रस्य माहात्म्यात् ब्रह्महत्या निवर्त्तते ॥
अविमुक्तं गता ये वै महापापकृतो नराः ।
अक्षया ह्यजराश्चैव अदेहाश्च भवन्ति ते ॥
अज्ञानाज् ज्ञानतो वापि स्त्रिया वा पुरुषेण वा ॥
यत्किञ्चिदशुभं कर्म्म कृतं मानुषबुद्धिना ।
अविमुक्तं प्रविष्टस्य तत्सर्व्वं भस्मसाद्भवेत् ॥

अथ तद्वासफलम्।

तत्र लिङ्गे—

सदा यजति यज्ञेन सदा दानं प्रयच्छति।
सदा तपस्वी भवति ह्यविमुक्ते स्थितो नरः॥
न सा गतिः कुरुक्षेत्रे गङ्गाद्वारे न पुष्करे।
या गतिर्विहिता पुंसामविमुक्तनिवासिनाम्॥
सर्व्वात्मना तपः[१] सत्यम् प्राणिनां नात्र संशयः।
अविमुक्ते वसेद्यस्तु मम तुल्यो भवेन्नरः॥
अविमुक्तं न सेवन्ते मूढ़ा ये तामसा नराः।
विण्मूत्ररजसां मध्ये ते वसन्ति न संशयः॥
अविमुक्ते स्थिता नित्यं पांशुभिर्वायुनेरितैः।
स्पृष्टा दुष्कृतकर्म्माणो यास्यन्ति परमां गतिम्॥
यस्तत्र निवसेद्विप्रः प्रयतात्मा समाहितः।
[२]त्रैकाल्यमपि भुञ्जानो वायुभक्षः सदा भवेत्॥

मासमेतद्वासे तु—

तत्र मासं वसेद्धीरो यवाहारो जितेन्द्रियः।
सम्यक् तेन व्रतं चीर्णं दिव्यं पाशुपतं महत्॥
जन्ममृत्युभयं तीर्त्त्वा स याति परमां गतिम्।
स श्रेयसीं गतिं पुण्यां तथा योगगतिं लभेत्॥

---

(१) ग पुस्तके तपस्तप्तं प्राणिना।

(२) ग पुस्तके त्रैलोक्यमपिरेतसाम्।

[१]न वियोगगतिर्लभ्या जन्मान्तरशतैरपि ।
प्राप्यते क्षेत्रमाहात्म्यात् प्रभावाच्छङ्करस्य तु ॥
एकाहारस्तु यस्तिष्ठेत् मासन्तत्र वरानने ।
यावज्जीवकृतं पापं मासेनैकेन नश्यति ॥

अथ कदाचिदपि वाराणसीवासमारभ्य यावज्जीव-मपरित्यागे तु ।

लिङ्गे—

आ देहपतनाद्यावत् क्षेत्रं यो न विमुञ्चति ।
ब्रह्मचर्य्यव्रतैः सम्यक् सम्यगिष्टं मखैर्भवेत् ॥
आ देहपतनाद्यावत् क्षेत्रं यो न विमुञ्चति ।
न केवलं ब्रह्महत्या प्राकृतस्य निवर्त्तते ॥

प्राकृतः संसारबन्धः ।

मात्स्ये—

विघ्नैरालोड्यमानोऽपि योऽविमुक्तं न मुञ्चति ।
स मुञ्चति जरां मृत्युं जन्म चैतदशाश्वतम् ॥

ब्राह्मे—

आ देहपतनादेतत्[२] क्षेत्रं सेवन्ति मानवाः ।
ते मृता हंसयानेन दिव्यं यान्त्यकुतोभयाः ॥

दिव्यं देवपदम् ।

---

(१) ग पुस्तके—न हि योगगतिः। (२) ग पुस्तके ये तु।

अथात्र मरणफलम् ।

तत्रैव—

विषयासक्तचित्तोऽपि त्यक्तभक्तिमतिर्नरः ।
इह चेत्रे मृतः सोऽपि संसारं न पुनर्विशेत् ॥
स्वर्गापवर्गयोर्हेतुरेतत्तीर्थवरं भुवि ।
यस्तत्र पञ्चतां याति मोक्षं याति न संशयः ॥
जन्मान्तरसहस्रेण युञ्जन् योगी यदाप्नुयात् ।
तमिहैव परं मोक्षं मरणादधिगच्छति ॥

इह जन्मनीत्यर्थः ।

ब्राह्मणाः चत्रिया वैश्याः शूद्रा वै वर्णसङ्कराः ।
कृमिम्लेच्छाश्च ये चान्ये सङ्कीर्णाः पापयोनयः ॥
कीटाः पिपीलिकाश्चैव ये चान्ये मृगपक्षिणः ।
कालेन निधनं प्राप्ता अविमुक्ते शृणु प्रिये ।
चन्द्रार्द्धमौलयः सर्व्वे ललाटाक्षा वृषध्वजाः ॥
शिवे मम पुरे देवि जायन्ते तत्र मानवाः ।
प्राणांस्त्यजन्ति ये तत्र प्राणिनस्तरवस्तथा[१] ॥
रुद्रत्वं ते समासाद्य मोदन्ते च मया सह ।
अकामो वा सकामो वा अपि तिर्य्यग्गतोऽपि वा ॥
अविमुक्ते त्यजन् प्राणान् मम लोके महीयते ।
मम भक्तिपरा नित्यं नान्यभक्ताश्च ये नराः ॥
तस्मिन् प्राणान् परित्यज्य गच्छन्ति परमां गतिम् ।

---

(१) क पुस्तके तत्त्वतस्तथा ।

मन्मना मम[1] भक्तश्च मयि सर्व्वार्पितक्रियः ।
यथेह मोक्षमाप्नोति अन्यत्र न तथा क्वचित् ॥
अग्निप्रवेशं ये कुर्य्युरविमुक्ते विचारतः ।
प्रविशन्ति मुखं ते मामपुनर्भाविनो जनाः ।
कुर्व्वन्त्यनशनं ये तु मद्भक्ताः कृतनिश्चयाः ।
न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ।
अविमुक्ते ह्यन्तकाले भक्तानामीश्वरः स्वयम् ।
कर्म्मभिः प्रेर्य्यमाणानां कर्णजापं प्रयच्छति ।

लैङ्गे—

अन्तकाले मनुष्याणां छिद्यमानेषु मर्म्मसु ।
वायुना प्रेर्य्यमाणानां स्मृतिर्नैवोपजायते ।
येऽविमुक्ते स्थिता रुद्रा भक्तानां प्रीतिदायकाः ।
कर्णजापं प्रयच्छन्ति डिमिचण्डेश्वरादयः ॥

[2]रामतापिन्यां शिवं प्रति श्रीरामवाक्यम्—

मुमूर्षोर्दक्षिणे यस्य कस्यापि वा स्वयम् ।
उपदेक्ष्यसि मे मन्त्रं स मुक्तो भविता शिव ! ॥

कर्णजापस्तारकब्रह्मोपदेशः ।

अत्र मरणस्य यद्यपि परममुक्ति सायुज्य सालोक्य सारूप्याणि फलत्वेन श्रूयन्ते तथापि शुचीनां परमात्मभक्तानां तदर्पितकर्म्मणां परममुक्तिस्ततोऽपकृष्टानामग्निप्रवेशादिना सायुज्यं तिर्य्यक्प्रभृतीनां

---

(१) ग पुस्तके मयि ।

(२) क पुस्तके पतितमिदं पद्यम् ।

मत्यन्तपापीयसां च सारूप्यम् । ततोऽप्यधमानां सालोक्यमिति द्रष्टव्यम् । तथैव पूर्व्वलिखितनानावचनस्वरसात् ।

केचित्तु—चतुर्विधपरिमाणायां काश्यां यथायथा योगपीठादिप्रकर्षस्तथा तथा मरणफलापकर्ष इत्याहुः ।

नरकगमनाभावस्तु सर्व्वेषामेव । तदुक्तं लैङ्गे—

नाविमुक्ते मृतः कश्चिन्नरकं याति किल्बिषी ।

ईश्वरानुगृहीता हि सर्व्वे यान्ति परां गतिम् ॥

उद्देशमात्रं कथिता अविमुक्तगुणास्तव ।

समुद्रस्येव रत्नानामविमुक्तस्य विस्तरः ॥

तथा—ज्ञानविज्ञाननिष्ठानां परमानन्दमिच्छताम् ।

या गतिर्विहिता नॄणां स्वर्णीले तु मृतस्य सा ॥

स्वर्णीलमुपक्रम्य—

प्राणानिह नरस्त्यक्त्वा न पुनर्जायते क्वचित् ।

अनन्ता सा गतिस्तस्य योगिनामेव या स्मृता ।

हिरण्यगर्भ-व्याघ्रेश्वरयोः समीपे स्वर्णीलेश्वरः ।

तथा विश्वनाथस्थाने अविमुक्त-महाश्मशान-योगपीठेति नामत्रयवाच्ये मृतस्य परममुक्तिरिति प्रपञ्चयिष्यते । मणिकर्णिकायां मृतस्य[1] च परममुक्तिरिति तापनी ।

---

(१) ग पुस्तके स्वर्नीले तु ।

अथात्र स्नानादिफलम् ।

मात्स्ये—

दशानामश्वमेधानां यज्ञानां यत् फलं स्मृतम् ।
तदवाप्नोति स धर्म्मात्मा स्नात्वा तत्र वरानने ॥
स्वल्पमप्यत्र यो दद्याद् ब्राह्मणे वेदपारगे ।
शुभां गतिमवाप्नोति अग्निवच्चैव दीप्यते ॥
उपवासन्तु यः कृत्वा विप्रान् सन्तर्पयेन्नरः ।
स [1]सौत्रामणियज्ञस्य फलं प्राप्नोति निश्चितम् ॥

विप्रानिति बहुवचनं कपिञ्जलन्यायात् त्रित्वपरम् ।

ब्राह्मे वाराणसीं प्रकृत्य—

तत्र दीपप्रदानेन ज्ञानवत् स्फुरतीन्द्रियम् ।
प्राप्नोति धूपदानेन स्थानं रुद्रनिषेवितम् ॥
वृषभं तरुणं सौम्यं चतुर्वत्सतरीयुतम् ।
यश्चाङ्कित्वा मोचयति स याति परमां गतिम् ॥
पितृभिः सहितो मोक्षं गच्छत्यत्र न संशयः ।
अङ्कश्चक्रत्रिशूलाभ्यां दक्षिण-वामपार्श्वयोः ॥

अन्यत्र तथा दर्शनात् ।

अतएव इतिकर्त्तव्यतान्तरमपि । न चाङ्कयित्वेति विशेषोपदेशादस्य बाधः सर्व्वशाखाप्रत्ययमेकं कर्म्मेति न्यायादन्यासामपि वृषोत्सर्गेतिकर्त्तव्यतानामत्रान्वयात् । नापि तद्विकृतीभूतेऽत्र गवोत्सर्गे विशेषोपदेशादन्यस्य बाधः । तेन सहास्य प्रकृतिविकृति-

(१) क ग पुस्तकद्वये सत्रनाम्नः ।

भावाभावात् न हि तद्धर्म्मोऽत्रातिदिश्यते निषिध्यते वा येन तथा स्यात् किन्तु कर्म्मेदं स्वतन्त्रमेव विधीयते गोदानादिवत्। स याति परमां गतिमिति तु तत्स्तुत्यर्थवादः, एकं वृणीतेतिवत् ।

तथा—

किमत्र बहुनोक्तेन यद्दानं क्रियते नरैः ।
धर्म्मकर्म्मार्थमुद्दिश्य तदनन्तफलं लभेत् ॥
अर्च्चयेदथ मां देवि अविमुक्ते वरानने ।
तस्य धर्म्मं प्रवक्ष्यामि यावदाप्नोति मानवः ॥
दशसौवर्णकं[1] पुष्पं योऽविमुक्ते प्रयच्छति ।
अग्निहोत्रफलं धूपे गन्धदाने शृणु प्रिये ॥
भूमिदानेन तत्तुल्यं गोप्रदानफलं स्मृतम् ।
सम्मार्ज्जने पञ्चशतं सहस्रमनुलेपने ॥
माल्ये शतसहस्रन्तु अनन्तं गीतवादिते ।

एकस्मिन् पुष्पे दशसुवर्णदानजन्यं फलं तथा धूपेऽग्निहोत्रजन्यं गन्धे भूमिदानजन्यं सम्मार्ज्जने गोपञ्चशतीदानजन्यमनुलेपने गोसहस्रदानजन्यं मालायां गोलक्षदानजन्यं गीते वाद्ये चानन्तगोदानजन्यं फलं भवतीत्यर्थः ।

सहस्रमित्यत्राविशेषितसहस्रपदं गोसहस्रपरमिति कल्पतरौ तथा व्याख्यानात् पितृभिःसह मोक्षं प्राप्नोतीत्यग्रे फलनिर्द्देशात् ।

---

(१) मूले सौवर्णिकम् ।

तत्र लिङ्गार्च्चने ।

अविमुक्ते महादेवमर्च्चयन्ति स्तुवन्ति ये ।
सर्व्वपापविनिर्मुक्तास्ते तिष्ठन्त्यजरामराः ॥
अविमुक्तं समासाद्य लिङ्गमर्च्चयते नरः ।
कल्पकोटिशतैश्चापि तस्य नास्ति पुनर्भवः ॥
अमरो ह्यक्षयश्चैव क्रीड़ेत् स भवसन्निधौ ।
ये तु ध्यानं समासाद्य युक्तात्मानः समाहिताः ॥
सन्नियम्येन्द्रियग्रामं जपन्ति शतरुद्रियम् ।
अविमुक्ते स्थिता नित्यं कृतार्थास्ते द्विजोत्तमाः ॥

तथा—

एकाहमुपवासं यः करिष्यति यशस्विनि ! ।
फलं वर्षशतस्येह लभते मत्परायणः ॥

वर्षशतस्योपोषितस्येत्यर्थः ।

लिङ्गे—

अतः परन्तु संवेद्यं गङ्गावरणसङ्गमम् ।
श्रवणद्वादशीयोगे बुधवारो यदा भवेत् ॥
तदा तस्मिन्नरः स्नात्वा सन्निहत्याफलं लभेत् ।
श्राद्धं करोति यस्तत्र तस्मिन् काले यशस्विनि ।
तारयित्वा पितॄन् सर्व्वान् विष्णुलोकं स गच्छति ॥

सन्निहत्या कुरुक्षेत्रस्था नदी। मात्स्ये—

वाराणसी-जाह्नवीभ्यां सङ्गमे लोकविश्रुते ।
दत्त्वाऽन्नञ्च विधानेन न स भूयोऽभिजायते ॥

असियुक्ता वरणा वाराणसी । स्कान्दे—

नदी वाराणसी येयं जाह्नव्या सह सङ्गता ।
सङ्गमे देवनद्याश्च यः स्नात्वा मनुजः शुचिः ॥
अर्च्चयेत् सङ्गमेशानं तस्य जन्मभयं कुतः ।

सङ्गमश्च अनन्तकेशवतः प्राच्याम् ।

वेदेश्वरस्य पूर्व्वेण स्वयं तिष्ठति केशवः ।
केशवस्य च पूर्व्वेण विश्रुतः सङ्गमेश्वरः ॥

इति वाराणस्यामीशानकोणवर्णने लिङ्गपुराणात् ।

मात्स्ये—

वायव्ये तु दिशो भागे तस्य पीठस्य सुन्दरि ।
लिङ्गं संस्थापितं तत्र सगरेण चतुर्मुखम् ॥

पीठो योगपीठम् ।

सागराद्वायवे भागे भद्रदोहं सरः स्मृतम् ।
गवां क्षीरेण संजातं सर्व्वपातकनाशनम् ॥
कपिलानां सहस्रस्य सम्यग्दत्तस्य यत् फलम् ।
तत् फलं लभते मर्त्त्यः स्नानात्तत्र न संशयः ॥
पूर्व्वभाद्रपदायुक्ता पौर्णमासी यदा भवेत् ।
तदा पुण्यतमः कालोऽप्यश्वमेधफलप्रदः ॥

विश्वनाथायतनवायव्ये वरणापूर्व्वे भीष्मचण्डिकाऽस्ति ।

तत्र च मात्स्ये—तत्प्रकरणे

यत्र सा दृश्यते देवी भीष्मचण्डिकाविश्रुता ।
वीभत्से विकृते भीमे श्मशाने वसते सदा ॥

अन्तकेश्वरपूर्व्वे सर्व्वेश्वरदक्षिणे मालतीश्वरोत्तरे [1]कृत्तिवासेश्वरं लिङ्गम् ।

तदुपक्रम्य लैङ्गे—

वाराणस्यां प्रमुच्यन्ते ये जनास्तत्र संस्थिताः ।
कृमिकीटाः प्रमुच्यन्ते महापातकिनश्च ये ॥

तथा—

कृत्तिवासेश्वरं[1] लिङ्गं ये व्रजन्ति शुभार्थिनः ।
ते रुद्रस्य शरीरान्तःप्रविष्टाश्चापुनर्भवाः ॥
अनेन च शरीरेण प्राप्ता निर्व्वाणमुत्तमम् ।
दशकोटिसहस्राणि तीर्थानां यत्र विश्रुतिः ॥
कृत्तिवासेश्वरो[2] यत्र तत्र सर्व्वे व्यवस्थिताः ।
तस्मिन् लिङ्गे तु सान्निध्यं त्रिलोक्या नाऽत्र संशयः ॥

तथा—

जन्मान्तरसहस्रेण मोक्षो लभ्येत वा नवा[3] ।
एकेन जन्मना तत्र कृत्तिवासे तु लभ्यते ॥
पूर्व्वजन्मकृतं पापं तपसाऽपि विशुध्यति ।
तत्क्षणान्नश्यते पापं तस्य लिङ्गस्य दर्शनात् ॥

तथा—

कृते तु त्र्यम्बकं प्रोक्तं त्रेतायां कृत्तिवाससम् ।
महेश्वरस्तु देवस्य द्वापरे नाम गीयते ॥

---

(१) ख—कृत्तिकेश्वरम् । ग—कृमिकीटेश्वरम् ।
(२) ग—कृमिकीटेश्वरः । (३) क—पुस्तके—मानवैः ।

हस्तिपालेश्वरं नाम कलौ सिद्धैस्तु गीयते ।

तथा,—

कृत्तिवासेश्वरो देवो द्रष्टव्यश्च पुनः पुनः ।
यद्दीक्षेत्तारकं ज्ञानं शाश्वतञ्चामृतं पदम् ॥

तथा,—

दर्शनाद्देवदेवस्य ब्रह्महाऽपि प्रमुच्यते ।
दर्शने पूजने चैव सर्व्वयज्ञफलं लभेत् ॥
श्रद्धया परया देवं येऽर्च्चयन्ति सनातनम् ।
फाल्गुनस्य चतुर्दश्यां कृष्णपक्षे समाहितः ॥
पुष्पैः फलैस्तथा धूपैर्दीपैर्नैवेद्यकैस्तथा ।
क्षीरेण मधुना चैव तोयेन सह सर्पिषा ॥
तर्पयन्ति परं लिङ्गमर्च्चयन्ति शिवं शुभम् ।
हुडुकार-नमस्कारैर्नृत्यगीतैस्तथैव च ॥
मुखवाद्यैरनेकैश्च स्तोत्रमन्त्रैस्तथैव च ।
उपोष्य रजनीमेकां भक्त्या परमया हरम् ॥
ते यान्ति परमं स्थानं सदाशिवमनामयम् ॥
भूताह्नि[1] चैत्रमासस्य पूजयेत् परमेश्वरम् ।
स तु विश्वेश्वरं प्राप्य क्रीड़ते यक्षराड़िव ॥
वैशाखस्य चतुर्दश्यां योऽर्च्चयेत् प्रयतः शिवम् ।
विशाखलोकमासाद्य तस्यैवानुचरो भवेत् ॥
ज्यैष्ठमासे चतुर्दश्यां योऽर्च्चयेत् श्रद्धया हरम् ।

(१) ग पुस्तके—भूताह्ने ।

स्वर्गलोकमवाप्नोति यावदाचन्द्रतारकम् ॥
चतुर्दश्यां शुचौ मासे योऽर्च्चयेत्तु सुरेश्वरम् ।
सूर्य्यस्य लोके सुसुखि क्रीड़ते यावदीप्सितम् ॥
श्रावणस्य चतुर्द्दश्यां कामलिङ्गसमन्वितम् ।
स याति वारुणं लोकं क्रीड़ते चाप्सरैः सह ॥
मासि भाद्रपदे नक्तमर्च्चयित्वा तु शङ्करम् ।
पुष्पैः फलैश्च विविधैरिन्द्रस्यैव स लोकभाक्[1] ॥
पितृपक्षे चतुर्द्दश्यां पूजयित्वा तथेश्वरम् ॥
सम्प्राप्य पितृलोकन्तु क्रीड़ते पूजितस्तु तैः ।
प्रबोधमासे[2] देवेशमर्च्चयित्वा महेश्वरम् ।
स चन्द्रलोकमासाद्य क्रीड़ते यावदीप्सितम् ॥
बहुले मार्गशीर्षस्य[3] पूजयित्वा पिणाकिनम् ।
विष्णुलोकमवाप्नोति क्रीड़ते कालमक्षयम् ॥
अर्च्चयित्वा तथा पुष्ये स्थानुं हृष्टेन चेतसा ।
प्राप्नोति तस्य वै स्थानं मोदते तेन वै सदा ॥
माघे समर्च्चयित्वा वै पुष्प-मूल-फलैः शुभैः ।
प्राप्नोति शिवलोकन्तु भुक्त्वा संसारसागरम् ॥
कृत्तिवासेश्वरं देवमर्च्चयेत्तं प्रयत्नतः ।
अविमुक्ते च वस्तव्यं यदीच्छेन्मामकं पदम् ॥

कृष्णादिक्रमेण चतुर्द्दशीष्विमानि कर्म्माणि शिवरात्रिमुप-

---

(१) ग—इन्द्रस्यैति स लोकताम् । (२) ग—प्रबोधयेत् सः ।
(३) क पुस्तके—मार्गशीर्षे च ।

क्रम्य फाल्गुनादौ कथनात् । तथा व्यासेश्वरपश्चिमे घण्टाकर्ण-ह्रदः । तत्र लिङ्गे,—

स्नानं कृत्वा ह्रदे तस्मिन् व्यासेशस्य च दर्शनात् ।
यत्र तत्र मृतो देवि वाराणस्यां मृतो भवेत् ॥

तथा,—

[1]दण्डखाते नरः स्नात्वा तर्पयित्वा स्वकान् पितॄन् ।
नरकस्थाश्च ये देवि पितृलोके वसन्ति ते ॥
पिशाचत्वं गता ये वै नराः पापेन कर्म्मणा ।
तेषाञ्च पिण्डदानेन [2]देहस्योद्धरणं भवेत् ॥
दर्शनात्तस्य खातस्य कृतकृत्योऽभिजायते ॥

तत्रैव ललितामुपक्रम्य,—

ये च त्वां पूजयिष्यन्ति तस्मिन् स्थाने स्थिताः स्वयम् ।
तेषां त्वं विविधान् भोगान् सम्प्रदास्यसि मानसे ॥
जागरं ये प्रकुर्व्वन्ति तवाग्रे दीपधारिणः[3] ।
तेषां त्वमक्षयान् लोकान् [4]निनयिष्यसि भाविनि ॥
आलयं ये प्रकुर्व्वन्ति भूमिं सम्मार्ज्जयन्ति च ।
तेषामष्टसहस्रस्य सुवर्णस्य फलं भवेत् ॥
त्वामुद्दिश्य च यो देवि ब्राह्मणं ब्राह्मणीं तथा ।
भोजयिष्यति देवेशि तस्य पुण्यफलं शृणु ॥

---

(१) ग पुस्तके—दन्तखाते ।
(२) ग पुस्तके—वासः स्वर्गे महीयते ।
(३) ख पुस्तके—तत्र पूजाविधानतः ।
(४) ग पुस्तके—विचरिष्यसि ।

तव लोके वसेत् कल्पमिहैव भारते [1]पुनः।
नरो वा यदि वा नारी सर्व्वभोगसमन्वितौ।
धनधान्यसमायुक्तौ जायेते महतां कुले॥
सुभगौ दर्शनीयौ च रूप-यौवनदर्पितौ।
भवेतामीदृशौ देवि सर्व्वसौभाग्यभाजनौ॥
मानुष्यं दुर्लभं प्राप्य विद्युत्सम्पातचञ्चलम्।
येन दृष्टाऽसि सुश्रोणि तस्य जन्मभयं कुतः॥
पृथ्वीं प्रदक्षिणीकृत्य यत् फलं लभते नरः।
तत्फलं ललितायाञ्च वाराणस्यां न संशयः॥
माघे मासि चतुर्द्दश्यां[2] तस्मिन् काल उपोषितः।
अर्च्चयित्वा तु यो देवि जागरं तत्र कारयेत्।
तस्यर्द्धिमत्कुलं देवि त्रैलोक्ये याति दुर्लभम्॥

तथा,—

नलकुवरेश्वरं नाम सर्व्वसिद्धिप्रदायकम्।
तस्यैव दक्षिणे देवि मणिकर्णीति विश्रुतम्॥
तस्य चाग्रे महातीर्थं सर्व्वपातकनाशनम्।
मणिकर्णीश्वरो देवः कुण्डमध्ये च तिष्ठति॥
अनेनैव तु देहेन सिध्यते तस्य दर्शनम्।

तथा,—

तस्य दक्षिणपार्श्वे तु गङ्गया स्थापितं पुरा।
गङ्गेश्वरेति नामानं सुरलोकप्रदायकम्॥

---

(१) क पुस्तके—इहैवागच्छते पुनः। (२) ग पुस्तके—चतुर्थ्यान्तु।

तथा,—

अन्यदायतनं वच्ये वाराणस्यां सुरेश्वरि ! ।
यत्र वै देवदेवस्य रुचिरस्थानमीप्सितम् ॥
नीयमानं पुरा देवि तल्लिङ्गं शशिमौलिनः ।
राक्षसैरन्तरीक्षस्थैर्व्रजमानैस्तु सत्वरम् ॥
अस्मिन् देशे यदायातास्तदा देवेन चिन्तितम् ।
अविमुक्तेन मोक्षस्तु कथं मे सम्भविष्यति ॥
इदमर्थन्तु देवेशो यावच्चिन्तयते प्रभुः ।
तावत् कुक्कुटशब्दस्तु तस्मिन् देशे समुत्थितः ॥
शब्दं श्रुत्वा तु तं देवि राक्षसास्त्रस्तचेतसः ।
लिङ्गमुत्सृज्य भीतास्ते प्रभातसमये गताः ।
गतैस्तु राक्षसैर्देवि लिङ्गं तत्रैव तं शिवः ॥
स्थाने तु रुचिरे शुभ्रे देवदेवः स्वयं प्रभुः ।
अविमुक्ते तत्र मध्ये अविमुक्ततरं स्मृतम् ॥
तदा विमुक्तं हि सुरेश्वरस्य नाम स्मृतं पुण्यतमाविमुक्तम् ।
मोक्षप्रदं स्थावरजङ्गमानां ये प्राणिनः पञ्चतां सम्प्रयान्ति ॥
कुक्कुटाश्चापि देवेशि तस्मिन् स्थाने स्थिताः सदा ।
अद्यापि तत्र दृश्यन्ते पूज्यमानाः शुभार्थिभिः ॥
अविमुक्तं सदा देवि यश्चेयाद्दक्षया नरः ।
न तस्य पुनरावृत्तिः कल्पकोटिशतैरपि ॥

दक्षया दक्षिणया दक्षिणत आरभ्य अविमुक्तस्थानप्रवेशरूपेति यावत् ।

देवस्य दक्षिणे भागे वापी तिष्ठति शोभना ।
तस्यास्तीर्थोदकं पीत्वा पुनरावृत्तिर्न विद्यते ॥
पीतमात्रेण तेनैव उदकेन सुरेश्वरि ।
त्रीणि लिङ्गानि वर्त्तन्ते हृदये पुरुषस्य तु ॥
यैस्तु तत्र जलं पीतं कृतार्थास्ते हि मानवाः ।
तेषान्तु तारकं ज्ञानमुत्पत्स्यति न संशयः ॥
वापीजलेन च स्नात्वा दृष्ट्वा च दण्डनायकम् ।
अविमुक्तं ततो दृष्ट्वा कैवल्यं लभते क्षणात् ॥
तत्र सन्ध्यामुपासित्वा ब्राह्मणः सकृदेव तु ।
कृतसन्ध्योऽथ विप्रः स्यात् पञ्च षट् च शतं समाः ॥
पुरीं वाराणसीं तान्तु श्मशानञ्चाविमुक्तकम् ।
अविमुक्तेश्वरञ्चैव दृष्ट्वा गणपतिर्भवेत् ॥

तथा—

अविमुक्तेश्वरं लिङ्गं सम्यक् दृष्ट्वा तु मानवः ।
सद्यः पापविनिर्मुक्तः पशुपाशैर्विमुच्यते ॥
अविमुक्तक्षेत्रस्यैव श्मशानमिति संज्ञान्तरम् ।

लैङ्गे—अविमुक्तस्य चाग्रे तु लिङ्गं पश्चान्मुखं स्मृतम् ।
प्रीतिकेश्वरनामानं प्रीतिं यच्छति शाश्वतीम् ॥
अविमुक्तस्योत्तरेण लिङ्गं पश्चान्मुखं स्मृतम् ।
अविमुक्तं ततो देवि नाम्ना वै लक्षणेश्वरः ॥
तेन दृष्टेन देवेशि ज्ञानवान् जायते नरः ।
तस्य चोत्तरतो देवि लिङ्गं यद्दै चतुर्मुखम् ॥

चतुर्थेश्वरनामानं पापानां भयमोचनम् ।

स्कान्दे—

क्षेत्रं वाराणसी पुण्या मुक्तिदन्तु भविष्यति ।
अविमुक्तेश्वरं मां वै योऽत्र द्रक्ष्यति मानवः ॥
गाणपत्ये गतिस्तस्य यत्र तत्र स्थितस्य हि ।
प्राणानिह च संन्यस्य प्राप्यते मुक्तिरुत्तमा ॥

तदयं सङ्क्षेपः—

अविमुक्तश्मशानोभयसंज्ञके क्षेत्रे शिवस्थापितमविमुक्तेश्वरं लिङ्गं विश्वनाथनाम्ना लोकप्रसिद्धम् । तदेव च कुक्कुटमण्डपस्थानं तत्र च दक्षिणद्वारेण प्रवेशेऽप्यपुनरावृत्तिः फलम् । तस्य तु दक्षिणे वापी विज्ञान-प्रजननत्वाद्विज्ञानवापीत्वेन प्रसिद्धा तस्यास्तु जल-पानाद्धृदये लिङ्गत्रयोदयः तारकज्ञानमपुनरावृत्तिश्च भवति ।

वाराणसीमविमुक्तनामकञ्च विश्वनाथगृहक्षेत्रं विश्वनाथञ्च दृष्ट्वा गणपतिर्भवति ।

एतत्क्षेत्रस्य प्रथमावरणे प्राच्यां प्रीतिकेश्वरनामानं पश्चिमा-भिमुखं लिङ्गमुत्तरस्यां पश्चिमाभिमुखं लक्ष्मणेश्वरनामकं लिङ्गं वायव्ये मगधेश्वरं दक्षिणस्यां विज्ञानवापी तद्दक्षिणे कामेश्वरं लिङ्गं एतदभ्यन्तरेऽविमुक्ततरे क्षेत्रे मृतस्य परं मुक्तिर्भवति ।

तथा द्वितीयावरणे प्राच्यां मणिकर्णिकेश्वरः, उत्तरस्यां चतुर्थेश्वरः, दक्षिणस्यां गङ्गेश्वरः ।

तथा—सप्तकोट्यस्तु लिङ्गानि अस्मिन् स्थाने स्थितानि हि ।
तेषां दर्शनमात्रेण यज्ञानां फलमाप्नुयात् ॥

एतानि सिद्धलिङ्गानि कूपाः पुण्यास्तथा ह्रदाः ।
वाप्यो नद्योऽथ कुण्डानि तथा ते परिकीर्त्तिताः ॥
एतेषु चैव यः स्नानं करिष्यति समाहितः ।
लिङ्गानि स्पर्शयित्वा च संसारे न विशेत् पुनः ॥
पृथिव्यां यानि तीर्थानि अन्तरीक्षे च यानि च ।
तेषां मध्ये च ये श्रेष्ठा मया ते कीर्त्तिताः शुभाः ॥
तीर्थयात्रा वरारोहे कथिता पापनाशिनी ।
येन चैषा कृता दृष्टा सोऽपि वै मुक्तिभाग्भवेत् ॥
अविमुक्तञ्च सुश्रोणि मया मध्यमकं शुभम् ।
तत्र तु कण्टकं नाम मृत्युकालेऽमृतप्रदम् ॥
अतःपरं प्रवक्ष्यामि यात्राकालांस्तु सर्व्वगे ।
चैत्रमासे च देवैस्तु यात्रेयं विहिता शुभे ॥
तस्यैव कामकुण्डे तु स्नानपूजनतत्परैः ।
ज्यैष्ठमासे तु सिद्धैस्तु यात्रेयञ्च कृता पुरा ॥
रुद्रावासस्य कुण्डे तु स्नानपूजनतत्परैः ।
आषाढ़े वापि यात्रेयं गन्धर्व्वैश्च कृता पुरा ॥
श्रियो देव्यास्तु कुण्डस्थैः स्नानपूजनतत्परैः ।
विद्याधरैस्तु यात्रेयं श्रावणे मासि तत्परैः ॥
लक्ष्मीकुण्डस्य संस्थैश्च स्नानपूजनतत्परैः ।
पितृभिश्चापि यात्रेयमाश्विने मासि तत्परैः ॥
मार्कण्डेयह्रदस्थैश्च स्नानपूजनतत्परैः ।
कृता यक्षैस्तु यात्रेयं मासि मार्गशिरे शुभा ॥

कपालमोचनस्थैस्तु स्नानपूजनतत्परैः ।
गुह्यकैश्चैव यात्रेयं पौषे मासि वरानने ॥
कालेश्वरस्य कुण्डस्थैः स्नानपूजनतत्परैः ।
पन्नगैश्चैव यात्रेयं माघे मासि तु तत्परैः ॥
कोटितीर्थे तु संस्थैश्च स्नानपूजनतत्परैः ।
पिशाचैस्तु यदा तस्मिन् फाल्गुनस्य चतुर्द्दशी ॥
तेन सा प्रोच्यते देवी पिशाची नाम विश्रुता ।
अतःपरं प्रवक्ष्यामि यात्रायां निष्कृतिं पराम् ॥
उदकुम्भास्तु दातव्या मिष्टान्नेन समन्विताः ।
तेन देवि तदा प्राप्तं पूर्व्वोक्तं फलमेव तु ॥
अतःपरं प्रवक्ष्यामि यात्रा यास्व वरानने ।
शुक्लपक्षे चतुर्द्दश्यां भवकान्ता महाफला ॥
तत्र गौरी तु द्रष्टव्या तां शृणुष्व वरानने ।
स्नानं कृत्वा तु गन्तव्यं गोप्रेक्षे तु यशस्विनि ॥
तस्मिन्नहनि सा देवी अर्च्चितव्या प्रयत्नतः ।
तस्मात् स्थानात्तु गन्तव्यमविमुक्तस्य चोत्तरे ॥
तत्र देवी सदा गौरी पूजितव्या प्रयत्नतः ।
अन्या चापि परा प्रोक्ता सर्व्वत्तानमिता शुभा ॥
द्रष्टव्या चैव सा देवी सर्व्वकामफलप्रदा ।
सर्व्वान् कामानवाप्नोति यदि ध्यायेत मानवः ॥
ततस्तु भोजयन् विप्रान् मम भक्तान् शुभव्रतान् ।
वासैः सदक्षिणैश्चैव यथार्हमतिपुष्कलैः ॥

पञ्चगौरीन्तु यः कृत्वा भक्त्या देवि समाहितः।
सर्व्वांश्चैव रसान् गन्धान् गौरीमुद्दिश्य ब्राह्मणे॥
उत्तमं श्रेय आप्नोति सौभाग्येन समन्वितः।

सर्व्वरसो गन्धर्व्वशास्त्रोक्तः। ब्राह्मणे दद्यादिति शेषः।

तथा तत्रैव—

विनायकान् प्रवक्ष्यामि अस्य क्षेत्रस्य विघ्नदान्।
ढोण्डिन्तु प्रथमं दृष्ट्वा तथा किल विनायकम्॥
दिव्यं विनायकञ्चैव गोप्रेक्षं हस्तिदन्तिनम्।
विनायकं तथैवान्यं सिन्दूर्य्यं नाम विश्रुतम्॥
चतुर्थ्यां देवि द्रष्टव्या एवं पञ्च विनायकाः।
लड्डुकाश्च प्रदातव्या एतानुद्दिश्य ब्राह्मणे॥
एतेन चैव धर्म्मेण सिद्धिमान् जायते नरः।
अतःपरं प्रवक्ष्यामि चण्डिकाः क्षेत्ररक्षिकाः॥
दक्षिणे रक्षते दुर्गा नैरृते चोत्तरेश्वरी॥
अङ्गारेशी पश्चिमे तु वायव्ये भद्रकालिका।
उत्तरे भीमचण्डा च महामत्तेशानतस्तथा॥
ऊर्द्ध्वकेशसमायुक्ता शङ्करी पूर्व्वतः स्मृता।
अधःकेशी तथाग्नेय्यां चित्रघण्टा तु मध्यतः॥
एतास्तु चण्डिका देवीर्यो वै द्रक्ष्यति मानवः।
तस्य तुष्टाश्च ताः सर्व्वाः क्षेत्रं रक्षन्ति तत्पराः॥
विघ्नं कुर्व्वन्ति सततं पापानां देवि सर्व्वदा।
तस्माद्देवि सदा पूज्याश्चण्डिकाः सविनायकाः॥

अन्यच्च ते प्रवक्ष्यामि तस्मिन् क्षेत्रे सुरेश्वरि ।
तिस्रो नद्यस्तु तत्रस्था वहन्ति च शुभोदकाः ॥
तासां दर्शनमात्रेण विप्रहत्या निवर्त्तते ।
एकाऽपि तत्र त्रिस्रोता मन्दाकिनी तथाऽपरा ॥
मत्स्योदरी तृतीया च एतास्तिस्रस्तु पुण्यदाः ।
मन्दाकिनी तथा पुण्या मध्यमेश्वरसंस्थिता ॥
पितामहस्रोतिका च अविमुक्ते तु पुण्यदा ।
मत्स्योदरी तु ॐकारे पुण्यदा सर्व्वदैव हि ॥
तस्मिन् स्थाने यदा गङ्गा आगमिष्यति भाविनि ! ।
तदा पुण्यतमः कालो देवानामपि दुर्लभः ॥
वरणासिक्तसलिले जाह्नवीजलविप्लुते ।
तत्र नादेश्वरे पुण्ये स्नातः किमनुशोचति ॥
तस्मिन् काले च तत्रैव स्नानं देवि कृतं मया ।
तेन हस्ततलाद्देवि कपालपातनं क्षणात् ॥
कमालमोचनं नाम तत्रैव सुमहत् सरः ।
पावनं सर्व्वसत्वानां पुण्यदं पुण्यदेहिनाम् (?) ॥
मत्स्योदरीजले गङ्गा ॐकारेश्वरसन्निधौ ।
तदा तस्मिन् जले स्नात्वा दृष्ट्वा चोङ्कारमीश्वरम् ॥
शोकं जरां मृत्युवर्त्मं न तेन स्पृशते नरः ।
तस्मिंस्तु यः शिवः साक्षादोङ्कारेश्वरसंज्ञितः ॥
एतद्रहस्यमाम्नातं स्नेहात्तव वरानने ।
अकारश्च उकारश्च मकारश्च प्रकीर्त्तितम् ॥

अकारस्तत्र विज्ञेयो विष्णुलोकगतिप्रदः ।
तस्य दक्षिणपार्श्वे तु उकारः परिकीर्त्तितः ॥
तत्र सिद्धिं परां प्राप्तो देवाचार्य्यो बृहस्पतिः ।
उकारं तत्र विज्ञेयं ब्रह्मणः पदमव्ययम् ॥
तयोस्तथोत्तरे भागे मकारं बिन्दुसंज्ञितम् ।
तस्मिन् लिङ्गे तु संसिद्धः कपिलर्षिर्महामुनिः ॥
तस्मात्त्वमपि गाङ्गेय ! मनःस्थैर्य्यं यदीच्छसि ।
लिङ्गस्याराधने यत्नं कुरुष्व नियतव्रतः ॥
निर्ममो निरहङ्कारः पदमाप्नोति शाश्वतम् ।

तथा,—

वाराणसीमभ्युपेत्य पञ्चायतनमुत्तमम् ।
आराध्यमानो देवेशं तस्मिन् स्थाने स्थितः सदा ॥

गाङ्गेयः स्कन्दः प्रक्रमात् ।

स्कन्दपुराणे,—

ततोऽहमास्थितो देवि स्थानेऽस्मिन् स्वयमेव हि ।
गोप्रेक्षक इति ख्यातः संस्तुतः सर्व्वदैवतैः ॥
गोप्रेक्षेश्वरमागत्य दृष्ट्वाऽभ्यर्च्च्य च मानवः ।
न दुर्गतिमवाप्नोति कल्मषैश्च विमुच्यते ॥
ततस्ता दह्यमानास्तु प्रसवैः सुरभीरपि ।
ह्रदेऽस्मिन् पितुरभ्येत्य शान्तास्तोयं पपुस्तदा ॥
कपिलाह्रद इत्येवं ततः प्रभृति कथ्यते ।
अत्रापि स्वयमेवाहं वृषध्वज इति स्मृतः ॥

सान्निध्यं भवने देवि सदा मे दृश्यतां स्थितम् ।
कपिलाङ्कदतीर्थेऽस्मिन् स्नात्वा संयतमानसः ॥
वृषध्वजमिमं दृष्ट्वा सर्व्वयज्ञफलं लभेत् ।
स्वर्लोकतां मृतश्चापि अर्च्चयित्वा तु मामिह ॥
लभते देहभेदेन गणत्वञ्चातिदुर्लभम् ।
अस्मिन् देवप्रदेशे तु गावो वै ब्रह्मणा स्वयम् ॥
शान्त्यर्थं सर्व्वलोकानां सर्व्वदुर्गा यथासुखम् ।
भद्रदोहं सरस्तत्तु पुण्यं पापहरं शुभम् ॥
शिरो भूत्वाहमत्रस्तः स्वर्गो मद्दर्शनाद्भवेत् ॥
अत्राहं ब्रह्मणानीय स्थापितः परमेष्ठिना ।
ब्रह्मणश्चापि संगृह्य विष्णुना स्थापितः पुनः ॥
पुनश्चापि ततो ब्रह्मा स्वर्लोकेश्वरसंज्ञकम् ।
स्थापयामास मे लिङ्गं स्वर्णालेश्वरनामकम् ॥
दृष्ट्वैनमपि देवेशं मम लोके महीयते ।
प्राणानिह नरस्त्यक्त्वा न पुनर्जायते क्वचित् ॥
अनन्ता सा गतिस्तस्य योगिनामेव सा स्मृता ।
अस्मिन्नेव महादेशे दैत्यो दैवतकण्टकः ॥
व्याघ्ररूपं समास्थाय निहतो दर्पितो बली ।
व्याघ्रेश्वर इति ख्यातो नित्यमत्राहमास्थितः ॥
न पुनर्दुर्गतिं यान्ति दृष्ट्वैनममरेश्वरम् ।
हिमवत्स्थापितं लिङ्गं शैलेश्वरमिति श्रुतम् ।
दृष्ट्वैतन्मनुजो देवि न दुर्गतिमवाप्नुयात् ॥

उत्पलो विदलश्चैव यौ दैत्यौ ब्रह्मणो वरात् ।
दृप्तौ लिङ्गञ्च तद्दृष्ट्वा त्वयैव निहतौ शुभौ ॥
सावज्ञं क(गट)न्यकेनात्र तस्येदं चिह्नमास्थितम् ॥
दृष्ट्वैव मम लिङ्गन्तु जैष्ठस्थानसमाश्रितम् ।
न शोचति पुनर्मर्त्त्यः सिद्धो जन्मनि जन्मनि ॥
समन्ताच्चैव देवैर्मे लिङ्गानि स्थापितानीह ।
दृष्ट्वा च नियतं मर्त्त्यो देहभेदे गणो भवेत् ॥
नदी वाराणसी चेयं पुण्या पातकनाशिनी ।
क्षेत्रमेतदलङ्कृत्य जाह्नव्या सह सङ्गता ॥
स्थापितं सङ्गमे तस्मिन् ब्रह्मणा लिङ्गमुत्तमम् ।
सङ्गमेश्वरमित्येवं ख्यातं देवि प्रदृश्यताम् ॥
सङ्गमे देवनद्याश्च यः स्नात्वा मनुजो भुवि ।
अर्च्चयेत् सङ्गमेशानं तस्य जन्मभयं कुतः ॥
स्थापितं लिङ्गमेतच्च शुक्रेण तव सूनुना ।
नाम्ना शुक्रेश्वरं लिङ्गं सर्व्वसिद्धामरार्च्चितम् ॥
दृष्ट्वैव मानवः सद्यो मुक्तः स्यात् सर्व्वपातकैः ।
मृतश्च न पुनर्जन्म संसारे तु लभेन्नरः ॥
जम्बूकोऽत्र हतो दैत्यो मयाऽतो जम्बूकेश्वरः ।
तमेनं मां तत्र दृष्ट्वा सर्व्वान् कामानवाप्नुयात् ॥
देवैः शक्रपुरोगैश्च एतानि स्थापितानीह ।
यस्माल्लिङ्गानि पुण्यानि सर्व्वकामप्रदानि च ॥
एवमेतानि पुण्यानि मन्निवासानि पार्व्वति ! ।

कथितानि तव क्षेत्रे वाक्यं गुह्यतरं शृणु ॥
महालयालयस्थं मां केदारे च व्यवस्थितम् ।
गणत्वं लभते दृष्ट्वा क्षेत्रेऽस्मिन् हरवल्लभे ! ॥
गाणपत्यपदं तस्मादतः सा मुक्तिरुत्तमा ।
अविमुक्तेश्वरं लिङ्गं मम दृष्ट्वेह मानवः ॥
सद्यः पापविनिर्मुक्तः पशुपाशैर्विमुच्यते ।
शैलेशं सङ्गमेशञ्च स्वर्नी(र्णा)लं मध्यमे पुरे ॥
हिरण्यगर्भमीशानं गोप्रेक्षञ्च वृषध्वजम् ।
उपशान्तशिवञ्चैव ज्यैष्ठस्थाननिवासिनम् ॥
शुक्रेश्वरञ्च विख्यातं व्याघ्रेशं जम्बूकेश्वरम् ।
दृष्ट्वा न जायते मर्त्त्यः संसारे दुःखसागरे ॥
इति कल्पतरौ वाराणसी-माहात्म्यम् ।

अथ माहात्म्यं काशीखण्डे—

अविमुक्तेशमात्रं यत्तदप्यक्षयतां व्रजेत् ।
अविमुक्तं गतः कश्चिन्नरकं नैति किल्बिषी ॥
अविमुक्ते कृतं पापं किन्तु वज्रं भवेद्दृढम् ।

भविष्ये—

त्रैलोक्ये यानि तीर्थानि सत्क्षेत्राणि च कृत्स्नशः ।
सेवन्ते सततं गङ्गां काश्यामुत्तरवाहिनीम् ॥
दशाश्वमेधे यः स्नात्वा दृष्ट्वा विश्वेश्वरं शिवम् ।

सद्यः पापैर्विमुक्तोऽसौ मुच्यते भवबन्धनात् ॥
गङ्गा हि सर्व्वतः पुण्या ब्रह्महत्याऽपहारिणी ।
वाराणस्यां विशेषेण यत्र चोत्तरवाहिनी ॥
वरणायास्तथास्याश्च जाह्नव्याः सङ्गमे नरः ।
स्नानमात्रेण सर्व्वेभ्यः पातकेभ्यो विमुच्यते ॥
काश्यामुत्तरवाहिन्यां गङ्गायां कार्त्तिके तथा ।
स्नात्वा विमुच्यते माघे महापापाऽतिपातकैः ॥
सर्व्वलोकेषु तीर्थानि यानि ख्यातानि तानि च ।
सर्व्वाण्येतान्यशेषेण वाराणस्यान्तु जाह्नवीम् ॥
उत्तराभिमुखीं पुण्यामागच्छन्ति दिने दिने ।
नित्यं पर्व्वसु सर्व्वेषु पुण्यैरायतनैः सह ॥
महापातकदोषादिदुष्टानां स्पर्शसम्भवम् ।
व्यपोहितं स्वपापञ्च जनः पापापनुत्तये ॥
जन्मान्तरशतेनापि सत्कर्म्मनिरतस्य च ।
अन्यत्र ऋषभिश्चापि[1] मोक्षो लभ्येत वा न वा ॥
एकेन जन्मना चात्र गङ्गायां मरणेन च ।
मोक्षस्तु प्राप्यते काश्यां नरेणानियतात्मना ।
तदारभ्य मुने काश्यां ख्यातो धर्म्मनदो ह्रदः ॥

---

(१) ग पुस्तके ऋषयश्चापि ।

अथ पञ्चनदम् ।

(तत्र काशीखण्डे ।)

धर्म्मो हरस्वरूपेण महापातकनाशनः ।
धुनी च धूतपापा सा सर्व्वतीर्थमयी शुभा ॥
हरिर्महोच्चसङ्घातान् कूलजानिव पादपान् ।
किरणा धूतपापा च पुण्यतोया सरस्वती ॥
गङ्गा च यमुना चैव पञ्चनद्योऽत्र कीर्त्तिताः ।
अतः पञ्चनदं नाम तीर्थं त्रैलोक्यविश्रुतम् ॥
तत्राप्लुतो न गृह्णीयाद्देहितां पाञ्चभौतिकीम् ।
अस्मिन् पञ्चनदीनाञ्च सम्भेदेऽघौघभेदिनि ।
स्नानमात्रात् प्रयात्येव भित्वा ब्रह्माण्डमण्डपम् ॥
प्रयागे माघमासे तु सम्यक् स्नातस्य यत्फलम् ।
तत्फलं स्याद्दिनैकेन काश्यां पञ्चनदे ध्रुवम् ॥
स्नात्वा पञ्चनदे तीर्थे कृत्वा च पितृतर्पणम् ।
विन्दुमाधवमभ्यर्च्च्य न भूयो जन्मभाग्भवेत् ॥
यावत्संख्यास्तिला दत्ताः पितृभ्यो जलतर्पणे ।
पुण्ये पञ्चनदे तीर्थे तृप्तिः स्यात्तावदाब्दिकी ॥
श्रद्धया यैः कृतं श्राद्धं तीर्थे पञ्चनदे शुभे ।
तेषां पितामहा मुक्ता नानायोनिगता अपि ॥
यमलोके पितृगणैर्गाथेयं परिगीयते ।
महिमानं पाञ्चनदं दृष्ट्वा श्राद्धविधानतः ॥

अस्माकमपि वंशेऽत्र कश्चित् श्राद्धं करिष्यति ।
काश्यां पञ्चनदं प्राप्य येन [1]मुच्यामहे वयम् ॥
तत्र पञ्चनदे तीर्थे यत्किञ्चिद्दीयते [2]यदि ।
कल्पक्षयेऽपि न भवेत्तस्य पुण्यस्य सङ्क्षयः ॥
वन्ध्याऽपि वर्षपर्य्यन्तं स्नात्वा पञ्चनदे ह्रदे ।
समर्च्य मङ्गलां देवीं पुत्रं जनयति ध्रुवम् ॥
जलैः पाञ्चनदैः पुण्यैर्वाससा परिशोधितैः ।
महाफलमवाप्नोति स्नापयित्वेष्टदेवताम् ॥
पञ्चामृतानां कलसैरष्टोत्तरशतामितैः ।
तुलितोऽधिकतां प्राप्तो विन्दुः पञ्चनदाम्बुनः ॥
पञ्चकूर्च्चेन पीतेन गात्रशुद्धिरुदाहृता ।
सा शुद्धिः श्रद्धया प्राश्य विन्दुं पाञ्चनदन्त्विमम् ॥
भवेदवभृथस्नानाद्राजसूयाश्वमेधयोः ।
यत्फलं तच्छतगुणं स्नानात् पाञ्चनदे तदा ॥
राजसूयाऽश्वमेधौ च भवेतां स्वर्गसाधनम् ।
आब्रह्मघटिकाच्छान्तं[3] भुक्त्यै पाञ्चनदाप्लुतिः ॥
स्वर्गराज्याभिषेकोऽपि न तथा सम्मतः सताम् ।
अभिषेकः पाञ्चनदो यथाऽनल्पसुखप्रदः ॥
शतं समास्तपस्तप्त्वा कृते यत्प्राप्यते फलम् ।
तत् कार्त्तिके पञ्चनदे सकृत् स्नानेन लभ्यते[4] ॥

(१) क शुच्यामहे ।
(२) ख वसु ।
(३) क गौरीम् ।
(४) ग पञ्चनदाम्भसा ।

इष्टापूर्त्तेषु धर्म्मेषु यावज्जीवकृतेषु च ।
अन्यत्र यत् फलं तत्स्यादूर्ज्जे [1]धर्म्मनदाप्लवात् ॥
न धूतपापसदृशं तीर्थं क्वापि महीतले ॥
यदेकस्नानतो नश्येदघं जन्मत्रयार्ज्जितम् ।
कृते धर्म्मनदं नाम त्रेतायां धूतपापकम् ॥
द्वापरे विन्दुतीर्थञ्च कलौ पञ्चनदं स्मृतम् ।
विन्दुतीर्थे नरो दत्त्वा काञ्चनं कृष्णलोन्मितम् ॥
न दरिद्रो भवेत् क्वापि न सुवर्णैर्वियुज्यते ।
गोभूतिलहिरण्याश्व वासोऽथ स्रक् विभूषणम् ॥
यत्किञ्चिद्विन्दुतीर्थेऽन्नं दत्वाऽक्षयमवाप्नुयात् ।
एकामप्याहुतिं दत्वा सुसिद्धेऽग्नौ विधानतः ॥
पुण्ये धर्म्मनदे तीर्थे कोटिहोमफलं लभेत् ।
तत्पञ्चनदतीर्थस्य महिमानमनन्तकम् ॥
को हि वर्णयितुं शक्तश्चतुर्वर्गशुभौकसः ॥

इति काशीमाहात्म्यं सम्पूर्णम् ।

इति श्रीमहामहोपाध्याय-श्रीवाचस्पतिमिश्र विरचिते
तीर्थचिन्तामणौ पञ्चमः काशी- प्रकाशः
सम्पूर्णतामगात् ।

---

(१) घ पञ्चनदाप्लवात् ।

Title	Rs.	As.
*Nirukta, (2nd Edition) Vol. I Fasc. 1 @ Rs. 1-4 ...	Rs. 1	4
*Nyāyavārtika, Fasc. 2--6 @ /10/ each ...	3	2
Nityācārapaddhatiḥ, Fasc. 1--7 @ /10/ each ...	4	6
Nityācārapradīpa Vol. I, Fasc 1--8 ; Vol II, Fasc. 1-4. @ /10/ each ...	7	8
Nyayabindutīkā, Fasc 1 @ /10/ each ..	0	10
*Nyāya Kusumāñjali Prakaraṇa Vol II, Fasc 1--3 @ /10/ each ..	1	14
Nyaya Vartika Tatparya Parisudhi, Fasc. 1-2 @ /10/ each ...	1	4
Nyayasarah ...	2	0
Padumawati, Fasc 1- 6 @ 2/ each ...	10	0
Prakrita Paingalam, Fasc 1--7 @ /10/ each ...	4	6
Parāçara Smṛti, Vol. I, Fasc 2-8, Vol II, Fasc 1--6 ; Vol III, Fasc. 1--6 @ /10/ each ..	11	14
Parāçara, Institutes of (English) @ 1/- each ...	1	0
Parīksamukha Sutram ...	1	0
Prabandhacintāmani (English) Fasc 1--3 @ 1/4/ each ...	3	12
Rasarnavam, Fasc 1-3 ...	3	12
Ravisiddhanta Manjari, Fasc 1 ...	0	10
Saddarsana-Samuccaya, Fasc 1-2 @ /10/ each ...	1	4
Samaraicca Kaha Fasc 1-5, @ /10/ each ...	3	2
Sāṅkhya Sūtra Vṛtti, Fasc 1--4 @ /10/ each ...	2	8
Ditto (English) Fasc 1--3 @ 1/- each ..	3	0
Six Buddhist Nyaya Tracts ...	0	10
Sraddha Kriyā Kaumudī, Fasc 1-6 @ /10/ each ...	3	12
Suçruta Samhita, (Eng) Fasc 1 @ 1/- each ...	1	0
Suddhikaumudī, Fasc 1-4 @ /10/ each ...	2	8
Sundaranandam Kavyam ...	1	0
Suryya Siddhanta Fasc 1-2 @ 1-4 each ...	2	8
Syainika Sastra ...	1	0
*Taittreya Brahmana, Fasc 11-25 @ /10/ each ...	9	6
*Taittiriya Samhitā, Fasc 27--45 @ /10/ each ...	11	14
Tāṇḍya Brāhmaṇa, Fasc 10--19 @ /10/ each ..	6	4
Tantra Vārteka (English) Fasc 1-10 @ 1/4/ each ..	12	8
*Tattva Cintamaṇi, Vol I, Fasc 1--9, Vol II, Fasc 2--10, Vol III, Fasc 1--2, Vol IV, Fasc 1, Vol V, Fasc 1 5, Part IV, Vol II, Fasc 1-12 @ /10/ each	23	12
Tattva Cintamani Didhiti Vivriti, Vol I, Fasc, 1-6; Vol I', Fc, 1, @ /10/ each	4	6
Tattva Cintamani Didhiti Prakas, Fasc 1-5, @ /10/ each ..	3	2
Tattvarthadhigama Sutram, Fasc 1 3 @ /10/ each ...	1	14
Tirthacintamoni, Fasc, 1-3, @ /10/ each ...	1	14
Trikaṇḍa-Maṇḍanam, Fasc 1-3 @ /10/ each ...	1	14
Tul'si Satsai, Fasc 1--5 @ /10/ each ..	3	2
Upamita bhava-prapañca kathā, Fasc 1-2, 5 13 @ /10/ each ...	6	14
Uvasagadasao, (Text and English) Fasc. 1--6 @ 1/- each ...	6	0
Vallala Carita, Fasc 1 @ /10/ ...	0	10
Varṣa Kriya Kaumudī, Fasc 1--6 @ /10/ each .	3	12
*Vayu Purāṇa, Vol I, Fasc 3 6 , Vol II, Fasc 1--7, @ /10/ each ...	6	14
Vidhana Parijata, Fasc 1--8 Vol- II Fasc I @ /10/ each ..	5	10
Ditto Vol II, Fasc 2 5 @ 1/4/ ...	5	0
Vivadaratnākara, Fasc 1--7 @ /10/ each ..	4	0
Vṛhat Svayambhu Purāṇa, Fasc. 1--6 @ /10/ each .	3	12
Yogasastra Fasc. 1-3 ..	3	12

Tibetan Series.

Title	Rs.	As.
Amarkosha ...	2	0
Baudhastotrasangraha, Vol I ...	2	0
A Lower Ladakhi version of Kesarsaga, Fasc 1--4 @ 1/- each ..	4	0
Nyayabindu of Dharmakirti, Fasc 1 ..	1	0
Pag Sam S'hi Tiñ, Fasc 1--4 @ 1/- each	4	0
Rtogs brjod dpag hkhri S'iñ (Tib & Sans Avadāña Kalpalatā Vol. I, Fasc 1--10 ; Vol II. Fasc. 1--10 @ 1/- each ...	20	0
Sher Phyin, Vol I, Fasc 1-5 ; Vol II, Fasc 1-3 , Vol III, Fasc 1-6, @ 1/ each	14	0

Arabic and Persian Series.

Title	Rs.	As.
Amal-i-Salih, or Shah Jahan Namah ...	2	0
Al Muqaddasi (English) Vol I, Fasc 1--4 @ 1/- each ..	4	0
Ain i-Akbarī, Fasc 1 22 @ 1/8/ each .	33	0
Ditto (English) Vol II, Fasc 1-5 Vol III, Fasc. 1-5, Index to Vol. II, @ 2/- each ..	22	0
Akbarnāmah, with Index, Fasc 1--37 @ 1/8/ each .	55	8
Akbarnamah, English Vol I, Fasc 1- 8 , Vol II, Fasc. 1--7, Vol III, Fasc. 1 2 @ 1/4/ each .	21	4
Arabic Bibliography, by Dr. A. Sprenger, @ /10/ ...	0	10
Conquest of Syria, Fasc. 1-9 @ /10/ each ...	5	10
Catalogue of Arabic Books and Manuscripts, 1-2 @ 1/- each ..	2	0

*The other Fasciculi of these works are out of stock and complete copies ‹ be supplied.

Title	Rs.	As.
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal Fasc 1--3 @ 1/ each . ..	Rs. 3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/8/ each	31	8
Faras Nama, of Hashimi	1	0
Ditto of Zabardast Khan	1	0
Farnang-i-Rashīdi, Fasc 1-14 @ 1/8/ each	21	0
Fihrist-i-Ṭūsi. or, Ṭūsy's list of Shy'ah Books, Fasc. 1--4 @ 1/- each ..	4	0
Gulriz	2	0
Hadiqatu'L, Haqiqat, (Text & Eng)	3	8
History of Gujarat	1	0
Haft Asmān, History of the Persian Masnawi, Fasc. 1 @ /12/ each ...	0	12
Hisātory of the Caliphs, (English) Fasc 1--6 @ 1/4/ each	7	8
Iqālnamah-i-Jahāngirī, Fasc. 1--3 @ /10/ each	1	14
Isābah, with Supplement, 51 Fasc. @ 1/- each	51	0
Ma'āsir-i-Rahīmī, Part I, Fasc 1--8 @ 2/ each . .	6	0
Maa'āsir-ul-Umarā, Vol I, Fasc 1--9, Vol II, Fasc 1--9 ; Vol III, 1-10 ; Index to Vol I, Fasc 10-11, Index to Vol. II, Fasc 10-12 ; Index to Vol III, Fasc 11-12 @ /1/ each	35	0
Ditto (Eng) Vol I, Fasc. 1--2, @ 1/4/ each	2	8
Memoirs of Tahmasp	1	0
Marhamu 'L-Ilali 'L-Mu'Dila Fasc 1--2	2	0
Muntakhabu-t-Tawārīkh, Fasc 1--15 @ /10/ each	9	6
Ditto (English) Vol. I, Fasc 1--7 ; Vol II, Fasc. 1--5 and 3 Indexes ; Vol III, Fasc 1 @ 1/ each ...	16	0
Muntakhabu-l-Lubāb, Fasc 1- 19 @ /10/ each	11	14
Ditto Part 3, Fasc 1--2 @ 1/- each	1	0
Nukhbatu-l-Fikr, Fasc. 1 @ /10/	0	10
Niẓāmī's Khiradnāmah-i-Iskandari, Fasc 1--2 @ /12/ each	1	8
Persian and Turki Divans of Bayram Khan Khan Khanan ...	1	0
Qawaninu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut Col. D C Phillott	5	0
Riyāzu-s-Salātīn, Fasc 1--5 @ /10/ each	3	2
Ditto (English) Fasc. 1--5 @ 1/	5	0
Shah Alam Nama	1	14
Tadhkira-i-khushnavīsān	1	0
Tubaquāt-i-Nāṣirī, (English), Fasc 1-14 @ 1/- each	14	0
Ditto Index	1	0
Tārikh-i-Fīrūz Shāhi of Ziyāu-d-dīn Barni Fasc 1--7 @ /10/ each .	4	6
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif. Fasc 1--6 @ /10/ each ..	3	12
Ten Ancient Arabic Poems, Fasc 1- 2 @ 1/8/ each ...	3	0
The Mabani 'L Lughat . A Grammar of the Turki Language in Persian	1	8
Tuzuk-i-Jahāngirī, (Eng) Fasc 1 @ 1/	1	0
Wis-o-Rāmīn, Fasc 1--5 @ /10/ each	3	2
Zafarnāmah, Vol I, Fasc 1--9, Vol II, Fasc 1--8 @ /10/ each	10	10

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES Vols XX @ 10/ each . 20 0
2. PROCEEDINGS of the Asiatic Society from 1875 to 1899 (1900 to 1904 are out of stock) @ /8/ per No
3. JOURNAL of the Asiatic Society for 1875 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16), @ 1/8 per No. to Members and @ 2/ per No to Non-Members

   N B —The figures enclosed in brakets give the number of Nos in each Volume.
4. Journal and Proceedings, N S , 1905, to date, (Nos. 1-4 of 1905 are out of stock), @ 1-8 per No to Members and Rs. 2 per No to Non-Members.
5. Memoirs, 1905, to date Price varies from number to number. Discount of 25% to Members
6. Centenary Review of the Researches of the Society from 1784-1883 ... 3 0
7. Catalogue of the Library of the Asiatic Society, Bengal, 1910, ... 8 0
8. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts 1--III. with 8 coloured Plates, 4to. @ 6/ each 18 0
9. Kaçmiraçabdāmṛta, Parts I & II @ 1/8/ 3 0
10. Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes by Major D. C. Phillott. ... 10 0

Notices of Sanskrit Manuscripts Fasc. 1-34 @ 1/ each 34 0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... 5 0

N B.—All Cheques, Money Orders, &c. must be made payable to the "Treasurer Asiatic Society," only

Books are supplied by V. P. P 8-8-12.